वधूनां हस्तैः सदयं यथा तथा आलूनाः पल्लवाः येषां ते नंदने इंद्रोद्याने द्रुमाः तेन तारकासुरेण छेदपा
ताश्च तेषां कर्मणि षष्ठी। अभिज्ञाः अनुभावकाः क्रियंते छेद्यन्ते पात्यन्ते चेत्यर्थः॥ ४१॥ वीज्यत इति। स च
तारकासुरः दर्पोष्मणा संतप्तः सन् सुरवंदीभिः बलेनापहृत्यानीताभिः कर्त्रीभिः श्वाससाधारणैः अविल
दणः तेन समरकं गतः अनिला येषां तानि तैः बाष्पस्य शीककरान् विंदून् वर्षन्तीति तैः चामरैः करणैः वीज्यते। ईज
गतिकुत्सनयोरिति अस्य विपूर्वस्य कर्मणि प्रयोगः। सुरवंदीनाम स्त्रीणां चामरेषु पतंति। अतएव बाष्पनिरि

१८

सुवर्णाष्टशाखस्याघ्रेति। तेन तारकासुरेण हरितां सूर्याश्वानां खुरैः क्षतानि समाक्रान्तानि मेरोः शृङ्गाणि शिखराणि
उत्पाद्य आमूलमुद्धृत्य स्वविषु स्वकीयेषु वेश्मसु गृहेषु आक्रीडंते अस्मिन्निति आक्रीडः उद्यानं तत्र पर्वताः
कृत्रिमाः उपचरिताः। सूर्याश्वखुरक्षुण्णत्वेन शृङ्गाणां तुंगत्वं मुक्तं। हरित्सु पूर्वेतु सूर्याश्वे वर्णेपि हरितेपि वेतिके
शवः। पुमानाक्रीड उद्यानमित्यमरः॥४३॥ मंदाकिन्या इति। मंदाकिन्याः दिग्वारणानां दिग्दंतिनां मदनावि
ले केतु खीकृतं पयः एव शेषं अवशिष्टं तत्र स्थितानां हेमांभोरुहाणि एव तस्या नियेणं संप्रति तस्य तारकासुरस्य
वाप्यः दीर्घिका धामस्थानं उश्वा घप्रातिरोपणी अंतरणादिकं सस्यमित्युच्यते। शिष्यत इति शेषं कर्मण्यणं च
त्रा॥४४॥ भुवनेति। विमानां पथि तस्य तारकासुरस्य आपातः अकस्मादागत्य उपरि उपरिपातः तस्माद्भ
यं तस्मात् खिलीभूते सति स्वर्गिभिर्देवैः भुवनानां मनुष्यादिलोकानामालोकने प्रीतिर्नानुभूयते तेन वाच्य
लिंगता दिग्वारणात्यनेन केवलं गजानामेव उपयोगः। न तु देवानामिति सूचयति॥४५॥ विततेषु अध्वरे
षु यज्ञेषु मिषतां स्पर्द्धया अपहरति। मिषतां नः इति अनादरे षष्ठी। स्पर्द्धमानानस्माननादृत्येत्यर्थः इति वा मा
यी। व्रीह्यादिपाठात्साधुः॥४६॥ उच्चैरिति। अनेन तारकासुरेण देहबद्धं कृतशरीरं चिरकालार्जितं यश इव श्रि
तइव हयरत्नं हयश्रेष्ठः उच्चैःश्रवा उच्चैःश्रवसम् अनु आहारि अपहृतः उच्चैःश्रवसः भावत्वात् [illegible] सामा

कु॰ ह्यमुक्तं ॥ ४७ ॥ किमिति प्रतीकारो न क्रियते तत्राह । तस्मिन्निति ॥ नः सर्वे उपायाः सामादयः क्रूरे तस्मिंस्तारकासुरे
प्रतिहतक्रियाः नष्टसामर्थ्या जाताः । तानि कस्मिन्निव । वीर्यवंति श्रेष्ठान्यौषधानि सन्निपातेन वः सान्निपातिकः तस्मिन्निव का
रइव ॥ ४८ ॥ जयेति । यच्च चक्रं अस्माकं जयाशास्ति प्रतिघातेन उत्थितन वार्चिर्यस्य तेन हरिचक्रेण हेतुना अस्य तारका
सुरस्य कंठे निष्कः उरोभूषणं अर्पितमिव भासते तेन सुवर्णानां हि म्नुरो भूषणे पलं । दीनारे पि च निष्कोस्त्री त्यमरः ॥ ४९ ॥
तदीया इति । निर्जितः ऐरावतः यैः तदीयाः तारकासुरसंबंधिनः गजाव प्रकीर्णं पुष्करावर्तकादिषु तोयदेषु अ
ह्यत यघातं अभ्यासंति । अभ्यासं कुर्वंति आदिशब्देन संवर्तकादयोपि गृह्यंते ॥ ५० ॥ तदिति । तत् तस्मात्कारणा
त् हे विभो तारकस्य शांतये विविनाशाय सेनान्यं सृष्टिलयाः सृज्यमानमिच्छामके कमिव ॥ मुमुक्षवः मोक्षमिच्छ
वः भवस्य संसारस्य शांतये इति नाशाय कर्मणां शुभाशुभमलदाहनानां वंधच्छेदं धर्मतत्वज्ञानमिव । कारणे का
र्योपचारात् ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुनेति वचनात् । हे च्छामः इति विभोः इति च्छेदः । प्रार्थनायां लो
ट् लृष्टमिति धातुसंवंधे प्रत्ययाः इति वर्तमाने साधु ॥ हृष्टमित्यपपाठः । हृष्टेर्हि द्राग्दशनदीनत्वात् धर्मस्यादधि
त्रियां पुल्लिंगे न्यायस्त्वभावयोः ॥ ५१ ॥ गोप्तारमिति ॥ गोत्रमितं सुरसेनानां कर्मणि षष्ठी गोप्तारं रक्षकं य
स्मिन् सेनान्यं पुरस्कृत्य शत्रुभ्यः वंदी निवजय श्रियं प्रत्यानेष्यति । पुनराहरिष्यति । अथवा सहोपमालंकारः । वंदी
सहजयामित्यर्थः । तमिच्छामितिपूर्वत्र संवंधः ॥ ५२ ॥ वचसीति । तस्मिन् पूर्वोक्ते व वसि हरिहस्पतिवचने अव

वपत्नी एकः पतिर्यस्य इति वा। पतिव्रतेत्यर्थः। एकपत्नीः तस्याः व्रतं पुरुषांतरादर्शनरूपं तं निमित्तं दुःखशील
यति। अभ्यस्यति। पर्याच्यजेतः दुःखं शीलं यस्याः इति वा। चाकृतया सौंदर्येण कृत्वा लोलं साभिलाषं मनः इंद्रवि
तं कां नितंबिनीं मुक्तलज्जां सती कंठस्वयंग्राहेण निबद्धौ दत्तौ बाहू यया तां इच्छति। तां कथय। सांत्वनी यत
इत्यर्थः। यत्र विदनिश्चिगमश्चेति अपवादे हे पि। कृत्यल्युटो बहुलमिति बहुलग्रहणात् घञपीति याच्य
तिरूपं॥ ७॥ संभोगश्रृंगारमधिकृत्यैवान्यां विप्रलंभश्रृंगारमधिकृत्याह। कयेति। हे कामिन् सुरते अप
राधः गोत्रस्खलनादिरूपः तस्मिन्सति कोपनया कया पादानतः सन्। अवधूततिरस्कृतोसि। कथयेति शे
षः। तस्याः शरीरं दृढानुतापं सन्प्रवालानां पल्लवानां शय्यैव शरणं यस्य तत्तादृशं करिष्यामि कोपः अ
स्याः अस्तीति कोपना॥ कोपशीलापि मद्वीणपातूत्वद्यानतविरहज्वरजनितसंतापा भविष्यतीत्यर्थः॥ ८॥
तव शत्रुं विजयमप्यहमेव करिष्यामीत्याह। प्रसीदेति। हे वीर प्रसीद नियोगदानेन प्रसादं कुरु वज्रं वि
श्राम्यतु। सुराणामरिः शत्रुः कतमः। कोपि प्राणी मदीयैः शरैः मोघीकृतं निष्फलीकृतं बाहुवीर्यं यस्य स
न्तूः कोपनप्रणयकलहेन स्फुरिताः अधराः यासां ताः स्त्रीभ्यः भीत्योपि विभेतु। अतिप्रौढोपि तव शत्रुः
ममपुष्पबाणविद्धः सन् स्त्रीभ्योपि भयं[illegible]सपतीति भावः॥ ९॥ तवेति। कुसुमायुधोपि अहं तव प्रसा

॥ वसतं एकं श्रेष्ठं सतबलं व्यापिनाकः पाणौ यस्य तस्य हरस्यापि विधेयं स्तुतिं कुर्यां अन्ये धन्विनः को मम
अपेधानुष्काः अकिं वित्करा इत्यर्थः। एकं संख्यातरे श्रेष्ठे केवलेतरयोस्त्रिषु। इति मेदिनिकरः। मधुर्मधुके
सुरनौवैत्रे दैत्यात्तरे पुमानिति विश्वलोचनः॥१०॥ अथेति। अथानंतरं आखिजलपद्रुः पादं ऊरुदेशात्। आ
क्रोत्या आक्रमणेन संनावितं पादपीठं यस्मिन् कमणि अवतायि संकल्पितेन मनसा विचारिते अर्थे शिवस
माधिमं गारूपभयो तने विहताश्र कटिता आत्मशक्ति निजसामर्थ्यं येन तं कामं इदं नाबे॥११॥ सर्वमिति। हे
सखे कमे तत्सर्वं लयि उपपन्नं यत उमे ममास्त्रो के के। कुलिशं भवच्च। वज्रादपि त्वमेव उत्तमं इत्याह।
पूर्वं वज्रं तपसः वीर्यप्रभावः तेन महत्सु कुण्ठं हतशक्तिकं। त्वं भवद्रूपं मम अस्त्रं पर्वतः तापसातापस
बुगमनशीलं अव्याहतशक्तिकमित्यर्थः। मनोभवत्वेन दुर्निवारत्वात् साधकं कार्यसाधकं च॥१२॥ अवे
मीति। हे काम ते सारं अवैमि। अतः आत्मसममतः हरौ॥ त्वां गुरुणि कार्ये नियोक्ष्ये खलु। तथा हि॥ केशे
नभूधरतामबेद्धपदेहस्य उद्वहनाय धारणाय शेषं अनंतं अनंतो व्यापदिश्यते। नियुज्यते॥१३॥ आशं
सतेति। हे पंचके ईश्वरे बाणानां गतिं बाणस्य गतिं प्रसारं आशंसता इच्छता कथयता त्वया नः अस्माकं कार्यं
प्रतिपन्नवत्वं ज्ञातप्रायां विशेषमाह। इदानीं अत्र कि वविषय वाणप्रयोगो देवैः असाध्याः द्विषः

२२

येषां यत्तांशानुजां देवानामीप्सितं अनिवार्यजानीहि। आङ्पूर्वात् शंसु स्तुतावित्यस्माद्रूपमाशंसते
ति। न तु आङ्पूर्व शास:। तस्यात्मनेपदित्वात्। प्रतिपन्नकल्पमिति ईषदसमाप्ताविति कल्पप्। निबोध
न इत्यस्य मो वादिकस्य स्वरितेतो रूपं। न तु बुध अवगमन इत्यस्य दिवादेः। तस्य आत्मनेपदित्वात्॥१४॥
अमी इति। अमी देवाः जयाय प्रशान्तु परिनेवा यत्नवस्य शिवस्य वीर्यप्रभरेतः समुद्भवसेनान्यं सेनापतिं
उशंति। इच्छंति। वशकान्तौ कान्तिरिच्छा। ब्रह्मांगभूः पुत्रो यस्य ब्रह्मणि परमात्मनि योजित आत्मा
अंतःकरणं येन स शिवः तदप्येकस्याः सो इषुस्तस्य निपातः तेन साध्यः हरणीयवित्तः ब्रह्मांगभूरित्य
नेन पूर्वमविदेवः पुत्रवानिति सूचितं॥ ब्रह्मणि योजितेत्यनेनास्माकमविषयः। स इति सूचितामेव
मानसं॥१५॥ तस्मादिति॥ प्रयतां निमतांतनूजां पार्वतीं जतात्मने ज्ञितं द्वियायत हेरावयितुं स्वतत्त्व
प्रयत्नं कुरुध्वं यां कांचिद्वेपामिकिमर्थं पार्वत्या मादरस्त्वत्राह। योषितु मध्ये ह्यमा समर्था तस्य शिव।
स्य वीर्यनिषेकषेकस्य भूमिः सैव पार्वत्येव उमे एव द्रमे इत्यादिना आत्मनु वा अलमण उपदिष्टक
यतात्मन इति वपार्वत्या। हरस्य वविप्रो बणास्त्वयमहेश्वर हृत्तिसूत्र नार्थे तस्मादि
षितं। प्रयतामिति चतुर्थी॥१६॥ गुरोरिति॥ नगेन्द्रकन्या च गुरोर्हिमवतः नियोगाद्धित्यकार्यं
तितुरुव्यर्थीनामिति पस्यंतं पञ्चरसंस्थां [illegible] इति मया अप्सरसां गुरुखेभ्यः श्रुतं। तदसत्यम
पर्वता। पविभूमौ तप

कु॰टी॰

पि भवतीत्याशंक्याह। सः वर्गः अप्सरसां सर्गः। घातः मत्प्रणिधिः मम चरः मुखो ऽस्य इति आख्यातोपयो-
ग इति पंचमी। प्रणिधिः प्रार्थने चरे इति अमरः॥१७॥ तदिति॥ तत्तस्मात्कारणात् सिद्धये गच्छ देवानां कार्यं
कुरु। अयमर्थः देवकार्यात्मकं वस्तु अर्थान्तरेण हि त्वंतरेणानन्यपरवससन्नस सिद्धये त्वामेव उत्तमं श्रेष्ठं प्र-
त्ययकारणं कारणत्वे नापेक्षते। दृष्टान्तमाह। बीजांकुरवः उत्पत्तेः प्रागंकुर इव। अर्थः स्याद्विषये मो-
क्षे शब्दवाच्ये प्रयोजने॥ व्यवहारे धने शास्त्रे वस्तुहेतुनिवृत्तिषु। इति रत्नायुधः। प्रत्ययोऽधीनशपथज्ञानविश्वा-
सहेतुषु इत्यमरः॥१८॥ आशंसितमिति। सुराणां आशंसितं जयाभ्युपाये साधनभूते तदरे तवैवास्वगा।
ति नीमेति संभावनायां। तवैवास्य प्रसास्य करणात्कथं कृतार्थत्वं तत्राह॥ अप्रसिद्धं अलभ्यत-
या अविख्यातमपि अनन्यसाधारणं अन्यतो विलक्षणमेव पुंसां कर्म यशसे भवति॥१९॥ सुराइ-
ति। एते सुराः समभ्यर्थ इत्याः अभिमुखीभूय सम्पगया चक्राः त्रयाणां विष्टपानां लोकानां।
कार्यं तारकोपप्लवाभावरूपं। तेनापेनैव कर्मकार्यं नरथसैन्यादिना। अतिहिंसं वन भवति। पुष्प-
चापलात् प्रस्तुतप्रीतिकरं। अतः स्पृहणीयं वार्यं यस्य सोऽसि। अहो बतेति। अहो बत मतं खेदे सं-
वुद्धो वानुकंपने। अहो बताद्भुतेपि स्यादिति विश्वलोचनः। विष्टपं भुवनं जगदित्यमरः॥२०॥

२२.

मधुश्चेति। हे मन्मथ असौ मधुर्वसंतश्च अनुक्तोपि मया अनाज्ञापितोपि साहचर्यात्ते सहच
रत्वात् तव सहायः सहागंतैव। अनुक्तेपि गमनं कथं तत्राह। हुताशनस्य अग्नेः प्रेरयिता उद्दीपयि
ता भवेत्यनेन प्रकारेण समीरणो वायुः केन आदिश्यते आज्ञाप्यते। न केनापि। यथा कस्यचिदाज्ञां विना वायुः
अग्निमुद्दीपयति। तथायं वसंतोपीत्यर्थः। हुताशनस्येति कर्मणि षष्ठी सहसा अयं ते गच्छतीति सहायः। प्रतिवस्तू
पमालंकारः॥२१॥ तथेति। मदनः कामः इंद्रस्य आज्ञां शेषां माल्यादत्तादिदानमिव मूर्ध्नी तथेत्युपादाय अभी
त्य प्रतस्थे प्रचलितः। स्निग्धातिशयेन दत्तं माल्यादिकं गृहीत्वेत्यर्थः। सहोपमालंकारः। इंद्रः तस्य कामस्य अंगं ऐरा
वणस्य आस्फालनेन नितेजो रथांकुशादिदृढीकृतेन कर्कशः कठिनः तेन हस्तेन पस्पर्श। एवंविधत्या
दिविशेषणेन अनेकयुद्धविजयित्वेपि त्वदपेक्षास्माकमिति सूचयतीत्यर्थः। प्रसादाभिज्ञानमित्यत्र आनंदश
प्रतिमीयत इति विश्वः॥२२॥ स इति। अंगस्य व्ययेन नाशेनापि प्रार्थिता कार्यसिद्धिर्येन स कामः अभिमतेन
इष्टेन माधवेन वसंतेन सख्या मित्रेण रत्या च शंकितेन विष्यतीति साशंकमनुप्रयातः अनुगतः सन् हिमवतः
संबंधी हे भवतः संस्थाणोः ईश्वरस्य आश्रमं जगाम। अंगव्ययेत्यादिविशेषणेन इंद्रेण पूज्यापुरःसरं प्रति
तत्वादिति द्रष्टव्यं। माधवः केशवे राधे वसंते वणमाधवीति। आश्रमो ब्रह्मचर्यादौ मुनिस्थाने क्रियामिति

कुं॰ विश्वलोचनः स्थाणू रुद्र उमापतिरित्यमरः ॥ १३ ॥ तस्मिन्निति । यद्यकर्व संतः तस्मिन्वने ईश्वरस्य तपोवने संपमि
नां मुनीनां तपसः समाधेः विघ्नैः कामस्य प्रतिकूलं यथा तथा वर्त्तितुं शीलं यस्य स सन् संकल्पयोनेः कामस्य
अभिमानम् तं अभिमीनमात्रत्वं नतः प्राप्तः तादात्म्येन वा अभिमानस्य मित्यर्थः । आत्मानं आतुरूपमा
दायविलसे । उल्लसा । आकल्प एवश्री दुर्मतद्वत्यर्थः । अभिमानः पुमान् वैज्ञाने प्रणयहिंसयारितिविश्वः ।
॥ १४ ॥ कुबेरेति । तस्मिन्नवसरे शमयंद दक्षिणायनलक्षणं कालं विलंघ्य अतिक्रम्य कुबेरेणगुप्तां रक्षितां दि
शंगंतु प्रवृत्ते सति दक्षिणा दिङ्मुखेन मघोः प्रारंभेण हेतुना गंधवाहं वायुं व्यलीकं नर्व्याडाल्पत्वेन वेल
सापेन वाजातं निश्वासमिव उत्ससर्ज । मुमोच । ततो दक्षिणानिलो वहतिसोत्यर्थः । दक्षिणाइत्यनेन प्रग
ल्भनायिकापि सूचिता । क्रीडाल्पविव्यलीकं स्यादित्यमरः । व्यलीकं विप्रियाकार्ये वैलक्ष्येष्वपीति विश्वः । मुख
वक्रेनिःसरणे पुष्पपायर्त्त योरपीतिविश्वः ॥ १५ ॥ असूतेति । अशोकः सद्यः वसंत प्रादुर्भावलक्षणं
घ्रात मुख्यप्रकांडात् स्कन्धतिआरभ्येव सपल्लवानि सकुसलया निकुसुमानि असूत ॥ १६
प्रसूतवान् । सुंदरीणां स्त्रीणां सिंजितैः ध्वनितैः ध्वनितः नूपुरः पादकटको यस्य एवंविधेन पादेन संपर्कं
स्पर्शं घात रूपं नापेक्षत । नापेक्षितवान् । अशोकः पुष्पयुक्तो भवतीति प्रसि

द्भिः। ततः प्रसूतीति। नाप्यकारवचनात् स्कंधादित्यपि चमीसाधुः। प्रसूतीत्यत्र व्ययं स्कंधः स्यात्तृपतावंशोंस
प्रायसमस्कंधयोः। कायेतरुप्रकांडेचेति मेदिनीकारः। असूतपूर्व्वप्राणिनामिविमोचने। इत्यस्य रूपं॥२६॥ स
खुरिति। मधुर्वसंतः प्रवालोद्गमः लतया उद्गतपल्लवान्येव चारूणि पत्राणि पत्त्राणि यस्मिन् समाप्तिं सं
पूर्णतां प्रापितेन नवं चूतं नवं चूतं चूतपुष्पं च तदेव बाणा इव बाणा इव बाणाः। तस्मिन् सखुः मनोभव
स्य कामस्य नामाक्षराणीव द्विरेफान् भ्रमरान् निवेशयामास स्थापितवान्। बाणोपरि नामलिखंतीति प्रसिद्धिः॥२७॥
वर्णप्रकर्षइति। कर्णिकारं कर्णिकारपुष्पं वर्णप्रकर्षे सति निर्गन्धतया गंधपत्याभावेन चेतः दुनोति स्म। संतापय
ति स्म। व्रसृणा किमिति। गंधयोगो न कृतस्तत्राह। विश्वसृजः ब्रह्मणः प्रवृत्तिः प्रायेण गुणानां सामग्र्यविधौ सं
पूर्णत्वेन विधाने पराङ्मुखी विमुखी। ब्रह्माएकत्र सर्वान् गुणान् न विधत्त इति भावः॥२८॥ बालेति॥२९॥ अ
विद्यमानो विकासो येषां तेषां भावः। तस्माद्बालेंदुरिव वक्राणि कुटिलानि अतिलोहितानि अत्यरुणानि पल
शानि पलाशकुसुमानि। वसंतेन समागतानां क्रीडार्थमिति तानां वनस्थलीनां साद्यः प्रत्यग्रस्तानि नख
क्षतानीव बभुः शुशुभिरे॥२९॥ लग्नेति। मधुश्रीमुखेः वसंतप्रारंभे लग्नः लीनः यः द्विरेफः स एव अंजनं ति
कज्जलरचनातया वि त्र श्रीमत्संज्ञकतरुकुसुमं प्रकाश्य बालः अभिनवः अरुणः सूर्यः तद्वत्कोमलेन संयु

कु°टी

दरेणरागेण लोहितेन ओष्ठ इव भूतस्य प्रवालः पल्लवः प्रवालोष्ठः तं अलंचकार । भूषयति स्म । तिलकपुष्पं सश्रीकं नूतनपल्लवं वा
तिलके तत्प्रादुर्भूतमित्यर्थः । अन्यापि भ्रमरसदृशकज्जलरम्यं तिलकं विशेषकं वदने निविश्य पल्लवसदृशं ओष्ठं रागेण लाक्षादि
नालंकरोति । अरुणो भास्वरे विख्याते लाक्षायां रक्तवर्णे च राग इति यादवः । तिलकः क्षुरकः श्रीमान् ॥३०॥ मृगा इति । प्रियालु
द्रुमाणां मंजर्यः तासां रजसः कणैः लवैः विघ्नितः प्रतिहतः दृष्टिपातो येषां मदेन उद्धताः प्रचंडाः हरिणाः प्रत्यनिलं अ
निलाभिमुखं यथा तथा मर्मर इति शब्दः एषामिति मर्मराः अशीर्णशुष्कपत्राणां मोक्षाः पाताः यासु ताः । वनस्थली विचेरु
रित्यर्थः । विपूर्वश्चरतिः सकर्मकः ॥३१॥ चूतेति । चूतांकुरस्य आस्वादः तेन कषायः सुरभिः कंठो यस्य कषायकंठो ध्वनिर्यि
स्यति वा । पुमांश्चासौ कोकिलश्च पुंस्कोकिलः एवं वनपारवार्थी । मधुरं यथा तथा चुकूज इति यत् तदेव कूजनं मनस्विनीनां
मानस्य विघाते दक्षं चतुरं स्मरस्य वचनं जातं । तदाकर्णनेन त्यक्ताभिमाना नास्त्रियः प्रियमानानुवर्तीत्यर्थः । अस्त्री कषा
योर्निर्यासरसे रक्ते लेपने । अंगरागे सुगंधे तु त्रिषु स्याल्लोहिते विवेति विश्वः । कोठागले सन्निधाने ध्वनौ मधुरपाद
पइति मेदिनिकरः ॥ यत्तु कूजेति संबोधनं कूजते रकर्मतत्वात् ॥३२॥ हिमेति । स्वेदस्य उद्गमः उद्भवः । हिमस्य शी
तस्य व्यथाया अपगमात् तद्गतविवर्णतादानीं अभावात् विशदाधराणां आपांडुरीतानां ईषत्पांडुरितानां मुखस्य
छविः कांतिर्यासां वसंते कामस्य उद्रेकात् किंपुरुषांगनानां पात्रविशेषकेषु पत्रावलीतिलकेषु पदं स्थानं चक्रे हि

मस्य उद्रेकात् व्यापेन आसां मुखे पाण्डुभाविककांतिः तां अहं मधुसमयः विशेषकोद्भासेन दर्शयिष्यामीति स्वेदा

क्रमः तेषु पदं चक्र इति भावः॥३३॥ तपस्विन इति स्थाणोः शिवस्य वनं ओकः स्थानं येषां ते तपस्विनः आकालिकीं
आकाले नवां तां मधोर्वसंतस्य प्रवृत्तिं वीक्ष्य प्रयत्नेन संस्तंभित उपशमिता विक्रिया येषां मनसां कथंचित्क्लेशेन ई
शाः स्वामिनो बभूवुः। तपस्विनः वसंतप्रवृत्तिदर्शनात् उत्पन्नां विक्रियां क्लेशेन निवारितवंत इत्यर्थः। आकालि
कमाद्यंतवचने इत्यकालशब्दस्य आकालिकादेशः। टिड्ढाणञित्यादिना ङीप्॥३४॥ तमिति। आरोपितं सज्जी
कृतं पुष्पचापं येन रतिर्द्वितीया यस्य तस्मिन् मदने तं देशं स्थाणोराश्रमं प्रपन्ने सति द्वंद्वानि क्रियया चेष्टया भावं
काष्ठां उत्कर्षं गतः। स्नेहश्च रसो रागश्च ताभ्यां अनुविद्धं संबद्धं भावं रत्याख्यं विवव्रुः। प्रकाशयामासुः। वृञ् वरणे
विपूर्वः। काष्ठोत्कर्षे दिशि स्थाने च सीमनीति विश्वः॥३५॥ मध्विति। द्विरेफः स्वां प्रियां अनुवर्तमानः कुसु
ममेव एकं मुख्यं पात्रं भाजनं तत्र मधु पुष्परसं पपौ। पीतवान्। कृष्णसारः मृगविशेषः शृंगेण संस्पर्शेन निमीलिते
अक्षिणी यस्याः तां मृगीं अकंडूयत कंडूयतवान्। कंडूगात्रविकर्षणे कंड्वादित्वाद्यक्। एकपात्रविशेषणं परस्प
रसिमावप्रकाशनार्थं। अनुवर्तमान इति प्रियापीतशेषानुपानं॥३६॥ ददाविति। करेणुः हस्तिनी सरसि
पङ्कजस्य रेणुः॥ तस्य गंधोऽस्यास्तीति गंधि गंडूषजलं मुखांतर्गतजलं गजाय ददौ। रथांगनामा चक्रवाकः
अर्धोपभुक्तेन उपभुक्तार्धेन बिसेन जायां संभावयामास गंडूषो मुखपूरे च करिहस्तांगुलावपीति विश्वः।

कुं टी

करेणुरिभ्यां स्त्रीणेभ इत्यमरः ॥३७॥ गीतेति ॥ किंपुरुषः गीतस्य अन्तराणि विशेषाः स्थायाम विशेषमूर्छनादिरूपाणि
तेषु सत्सु श्रमेण जातं वारि स्वेदः तस्य शैलैः कणैः किंचित् समुच्छ्वासिता आर्द्रीभावाद् उद्गुच्छीनी म्लानपत्रलेखा यत्र तं
पुष्पासवेन पुष्पमधुना घूर्णिताभ्यां नेत्राभ्यां शोभनतद् इति शोभि प्रियामुखं चुचुंव । चुंवितवान् । चुंवि वक्त्रसं
योगे । चुचुंवे इति पाठे कर्मव्यतिहारे स्त्रीपुंसयोरन्योन्यचुंवनादात्मनेपदं प्रष्टव्यो मैरेयमासवः सीधुरित्यमरः
॥३८॥ पर्याप्तेति । तरवो विपर्याप्ताः परिपूर्णाः पुष्पस्तवका एव स्तना यासां ताभ्यः स्फुरन्ति प्रवालान्येव ओष्ठाः
तैः मनोहराभ्यः लताएव वध्वः ताभ्यः विनम्राः शाखा एव भुजाः तैः वंधनानि आलिंगनानि अवापुः ले
भिरे । अचेतनामपि यं गतिः चेतनानां किं वक्तव्यमित्यपेरर्थः ॥३९॥ श्रुतेति । अस्मिन् क्षणे हरः श्रुता
प्सरसां गीतिर्येन स अपि प्रसंख्यानपरः समाधिनिष्ठ एव बभूव ॥ किमित्ति न तस्य विकारः तत्राह । हि
यस्मात् विघ्नाः वसंतादयः अजातु कदाचिदपि आत्मेश्वराणां वश्यपवनसां समाधेर्भेदः भंगाः तत्र प्रभवः स
मर्था न भवंति ॥४०॥ लतेति । अथानंतरं लतामयस्य गृहस्य द्वारं गतः नंदी वामप्रकोष्ठे अर्पितं हेमवेत्रं येन स
सन् । मुखे अर्पिता या एकांगुलिः तस्याः संज्ञया एव चापलाय मा भव इति शिवगणान् हरिणादिवाणान् व्यनैषीत् । शिक्षि
तवान् । दक्षिणहस्तांगुल्या तर्जन्या नाख्या वामप्रकोष्ठयुक्तः संज्ञा स्याच्चेतनानाम हस्ताद्यैश्चार्थसूचनेत्यमरः

२६

प्रकोष्ठे मणिबंधे कूर्परस्यांतरेऽपि चेति मेदिनिकरः ॥४१॥ निष्कंपमिति सर्वमेव काननं नंदिनः शासनात् निष्कंपाः निश्च-
लाः वृक्षाः यस्मिन् निभृताः निश्चलाः द्विरेफाः भ्रमराः यस्मिन् मूकाः निःशब्दाः अंडजाः कोकिलादयो यस्मिन् शांतः
मृगाणां प्रचारः भ्रमणं यत्र एवंविधं सत् चित्रे अर्पितः आरंभः उद्योगो यस्य तदि[illegible]काननस्थं । चित्रे अर्पिता आरण्येभवाः
आरण्याः वृक्षादयो यत्र तदिव अवतस्थे । उद्भिज्जस्वेदजांडजजरायुजचतुर्विधा सृष्टिः रुद्धा ॥४२॥ दृष्टीति । कामः प्रवाणपुरः
शुक्रमिव दृष्टेः अतीपप्रतिमुखदेशं परिहृत्य दृष्टिपपातमिति पाठे दृष्टिगोचरमित्यर्थः । प्रांतेषु समीपेषु संसक्ताः न
मेरूणां शाखाः यत्र तत्स्मरतपतेः शिवस्य ध्यानस्य गृहं विशेषः । संसक्तेति विशेषणं कामस्य आक्रादयोग्यस्थानमिति
दर्शितं ॥ अतिवुधं प्रशुक्रे प्रत्यंगमारकमेवच ॥ अपि शत्रौ समीराणां कृतसैन्यो निवर्तते ॥ नमेरुः सुरपुंनाग इति ।४३।
सह इति । स कामः आसन्नः शरीरस्य पातः नाशः यस्य सः सन शार्दूलस्य व्याघ्रस्य चर्मणा व्यवधानं यस्याः । तस्यां देव
दारुद्रुमस्य अवस्थितायां तायां वेदिकायां उपविष्टं संयमिनं ध्यानस्थं त्रिलोचनं त्र्यंबकं इति पाठे कृत्तं दसिद्धज्ञदे
शाह्यश्लोकत्वात् तादृशस्य नाशायामपि साधुः ॥४४॥ पर्यंकेति । पर्यंकस्य वीरासनस्य बंधेन स्थिरः काय
स्य पूर्वो भागः पूर्वकायो यस्य तं ऋजुः आयता वा यतश्च तं ऋजुरी बाधकवयवयोगात् ऋजुः शिरस उन्नतत्वा
त् आयतो दीर्घः सम्यक् निमितो उभौ उन्नमितौ अंसौ यन अंके पाणिद्वयसंनिवेशात् अंशोन्नतत्वेन नतांनं
उर्ध्वमुखं यत्पाणिद्वयं तस्य सन्निवेशः द[illegible] धारणं तस्मात् अंके मध्ये कृतसंगमध्ये

कुटी॰

प्रफुल्लं राज्ञीवं पसं यस्य तमिव स्थितं त्रिलोचनं ददर्शेति पूर्वत्र संबंधः॥ एकं पादमथैकस्मिन्विन्यस्योरु[णि]
संस्थितं। इतरस्मिंस्तथा चोरुं वीरासनमुदाहृतं। उत्तानिते करतले करमुत्तानितं परं। आध्यायांकगतं कृत्वा
ध्यायेन घस्तस्य नांतरामिति योगसारे॥४५॥ भुजंगमेति। भुजंगमेन वासुकिना उन्नद्धः ऊर्द्धीकृत बद्धः
जटाकलापः जटाजूटो येन तं कर्णे अवसक्तं द्विगुणं अक्षसूत्रं अक्षमालायेन तं कंठस्य प्रभया नीलकं
त्यासंगः संयोगतेन कृत्वा विशेषेण नीलां ग्रंथिमतीं म्रगत्वचं दधानं त्रिलोचनं ददर्शेति पूर्वत्र संबंधः॥
द्वौ गुणौ यस्य तद्द्विगुणं अनेन ध्यानावसरः सूचितः। ध्यानकाले अक्षसूत्रं द्विगुणीकृत्य कर्णे आसं
जयंतीति भावः॥ जपकाले तु एकगुणं॥४६॥ किंचिदिति॥ किंचित्प्रकाशाः ईषद्व्यक्ताः स्तिमिताः
निश्चलाः; उग्राः; रश्मीनां मुञ्जी मूयनि. स्मरणात्क्रूरा तारा कनीनिका येषां तैः अक्षैः विक्रियाद्वेप
निवृत्तः प्रसंगो येषां तैः आविः अविस्पंदिता निश्चलीकृता पक्ष्ममाला नेत्रप्रांतलोमपङ्क्तिः
णंत स्कंधा विरतः नेत्रैः लक्षीकृतं घ्राणाग्रं येन तं त्रिलोचनं ददर्शेति पूर्वत्र
र्यपातैः अक्षोभमुखैः अक्षपक्ष्मान्तिस्मरत्किरणैः
संबंधः॥४७॥ अवृष्टीति। अंतश्चराणां मरुतां निरोधात् नविघ्नातेवृष्टिः संरंभोगर्जिताद्याडंबराय
यस्य तं अपामाधारं समुद्रमिव स्थितं निवातेन
स्यतं अनुरीवाहं मेघमिव स्थितं अनुद्भूतास्तरंगा

२२

वालानावेन निष्कंपं निश्चलं लोचनं ददर्शेति पूर्वत्र संबंधः। मरुतोत्र प्राणापानादयः॥४९॥ कपालेति क-
पालस्य नेत्रावकाशान्तरप्रवृत्तैः कपालस्य नेत्रान्तराणि नेत्ररंध्राणि तत्र लब्धः मार्गो यैः। शिरस्तः शिर-
सि उद्दितैः व्यक्तीकृतैः ज्योतिःप्ररोहैः तेजोंकुरैः बालस्य कलामात्रस्य इन्दोः मृणालसूत्रात् अधिकं सौकुमा-
र्यं यस्य तां लक्ष्मीं लपयंतं तिरस्कुर्वंतं त्रिलोचनं ददर्शेति संबंधः। वायोः सुषुम्नायां नियमितगतित्वेन प्रत्य-
ग्ज्योतिषः ब्रह्मरन्ध्रेण निर्गमः॥५०॥ मनइति। क्षेत्रविदः क्षेत्रज्ञाः नवभ्यः द्वारेभ्यः निषिद्धा वृत्तिर्यस्य तत्सम-
धिवश्यं समाधिवश्यं समाधिना वश्यं स्वायत्तीकृतं मनः हृदये व्यवस्थाप्य ये परमात्मानं अक्षरं अक्षरत्वेन विदुः जानं-
ति। तमात्मानं परमात्मानं स्वस्मिन्नवलोकयंतं त्रिलोचनं ददर्शेति संबंधः। चक्षुषी श्रोत्रे नासिके वक्त्रं पायूप-
स्थ इति नवद्वाराणि। व्यवस्थाप्येत्यस्य कर्त्तारः क्षेत्रविदः न तु शंभुः तस्य त्रिनेत्रत्वात् दशद्वाराणि भवंति। अथ-
वा तृतीयनेत्रविहितत्वान्नवद्वाराण्येव। यदा शंभुः कर्त्ता तदा व्यवस्थाप्य ते आत्मानमवलोकयंतं तस्मिन्निति
कं यं क्षेत्रविदः अक्षरं विदुरिति योजना। हृदयं मनोव्यतिरिक्तं तथा च श्रुतेः यत्पुंडरीकसदृशं हृदयं स्या-
दधोमुखं। जाग्रत्तद्विकसति स्वपतश्च निमीलतीति। न क्षरतीत्यक्षरः परमात्मा विदुरिति तीति विदो लट्यवेति
नरिज्ञस्य॥५०॥ स्मर इति। स्मरः कामः तथाभूतं समाधिस्थं मनसाप्यधृष्यं धर्षयितुमशक्यं अयुग्मनेत्रं त्रिने-

कुं॰टी॰ मनेत्रं शिवं अदूरात्समीपस्थः सन् साध्वसेन भयेन स्रस्तो शिथिलो हस्तो यस्य स सन् स्वहस्तात्स्रस्तं पतितं शरं चापमपि लक्षय
ति । लक्षितिवान् । अदूरात् पंचम्यर्थे प्रथमा । अदूराद्यावंतिकार्थेभ्यः । ङिड्यर्थे प्रत्ययाः स्मृता इति वचनात् । विभक्त्यर्थः प्रा
तिपदिकार्थः ॥७१॥ निर्वाणेति । अथानंतरं निर्वाणभूयिष्ठं बहुतरं निर्वाणं प्रशांतं अस्य कामस्य वीर्यप्रभावं व
पुषः गुणेन सौंदर्यगुणेन संधुक्षयंती उद्दीपयंतीव स्थिता वनदेवताभ्यां विजयामालिनीभ्यां सखीभ्यां अनुप्रयाता अनुगच्छ
ता स्थावरराजस्य हिमवतः कन्या पार्वती दृश्यत । औष्ठप्रिप्रस्थवासिन्यस्त्रियः वदनेव ताशब्देन विवक्षिताः । निर्वाणभूयिष्ठमि
ति आहिताग्न्यादिपाठात्परनिपातः । निर्वाणं निर्वृत्तो मा देवि नाशो गजमज्जन इति यादवः ॥७२॥ अशोकेति । अशोकेन अशो
कपुष्पेन अतिलोहितत्वात् निर्भर्त्सितः पद्मरागो यस्मिन् तत्तु । आकृष्टानिंदिता हेमद्युतिः सुवर्णकांतिर्यस्य तादृशं ।
कर्णिकारपुष्पं कस्मिन् मुक्ताकलापीकृतानि मुक्ताभूषणीकृतानि सिंदुवारपुष्पाणि यस्मिन्च संतेव वसंतसंबंधि
पुष्पमयमाभरणं वहंती स्थावरराजकन्या अदृश्यतेति पूर्वत्र संबंधः । सिंदुवारेदुत्तरसं निर्गुंडीन्द्राणिकेत्यपीत्य
मरः ॥७३॥ आवर्जितेति । स्तनाभ्यां किंचिदिव किंचित् आवर्जितानम्रा तरुणः नूतनश्चासावर्कश्चासौ तस्य रागइव व
र्णो यस्य वासः वस्त्रं वसाना परिदधाना सती सुजातैः मनोहरैः पुष्पस्तवकैः पुष्पगुच्छैः अवनम्रा पल्लविनी प्रश
स्तपल्लवा संचारिणी लतेव स्थिता अदृश्यत वसानेति वस आच्छादने आदादिरात्मनेपदी । किंचिदिवेति इव शब्दो वाक्या
लंकारे । तरुणो यूनि नवके इति विश्वः । वसंते स्त्रियः रक्तवस्त्रधारणं कुर्वंति ॥७५॥ स्रस्तामिति । नितंबात् स्रस्तां स्रव

१८

लं तीस्थानविद्यानिक्षेपस्थानविदा अत्र निक्षिप्तमिदं आपत्समये समापततीति ज्ञानवतेत्यर्थः। स्मरेण कार्मुक
स्यन्यासीकृतां द्वितीयां मौर्वीं नारीमिवस्थितां केसरपुष्पकांचीं मुहुर्मुहुः अवलंबमानाय थास्थानं अवरोपयंती वी
स्यावरराजकन्या अदृश्यत। कामेनेति शेषः। मौर्वीं द्वितीयामिति कार्मुकस्येति पाठः साधुः। साध्यत्वप्रतीतेरनूतो
पमाप्रतीतेः। समासे तु द्वितीयस्य त्वस्य सिद्धरूपस्यपात स्यात्र प्रतीतेः। स्रस्तामिति धातुसंबंधे प्रत्यया इति वर्त्तमाने
साधुः। केसरो बकुले सिंहच्छटायां नागकेसरे इति विश्वः॥५५॥ सुगंधीति। विलोलदृष्टिः सती गंधेच्छया मोनिश्वा
सस्थतस्मिन्बिम्बाधरे यस्य बिंबवद्वोष्ठमधरः तस्य अत्यन्तं पथा तथा चरतीति वरं द्विरेफं लीलारविंदेन प्रतिह
एं निवारयंती गौरी अदृश्यत। गंधस्येगुत्पूतिसुसुरभिन्य इति इकारान्तः॥५६॥ तामिति। पुष्पधन्वा कामः सर्वे अवयवा
अनवद्या सुंदरी रतेः कामवद्धा अपिह्रीपदं लज्जास्थानत्वं भावप्रधानो निर्देशः। आदधानां आरोपयंतीं तां पार्व
तीं दृष्ट्वा जितेंद्रिये शूलिनि ईश्वरे स्वकार्यस्य समाधिं मंगलक्षणस्य सिद्धिं। पुनराशशंस। शंसु स्तुतौ॥५७॥ भविष्यत इ
ति। उमापति भविष्यतः भाविनः पत्युः स्वामिनः शंभोः प्रतिहारभूमिं द्वारभूमिं समाससाद। प्राप्तमती। स ईश्वरश्च चेतः
हृत्यपंगतं आत्मसंज्ञं परं मुख्यं ज्योतिः दृष्ट्वा योगात् चित्तवृत्तिनिरोधात् उपारराम निवर्तते। व्याङ्परिभ्यो रमः इ
ति परस्मैपदं॥ द्वारि द्वाःस्थे प्रतीहार इति विश्वः॥ परं दूरान्यमुख्येषु परोऽरिपुपरात्मनोरिति यादवः। अविशुद्धं च
शब्ल्यांन्यां एककालत्वं सूचितं॥५८॥ ततइति॥ ततः [illegible] तरं दृशः भुजंगाधिपतेः शेषस्य फणाग्रैः अ

कु॰टी॰
२९

धः पाताले कंचित्केनापि प्रकारेणाद्भुतः स्तम्भिता गो यस्मिन् तत्स्थाने : कृता प्राणिनां विमुक्तिर्येन स सन्तानि विजं
पर्यंकबंधः विभेद। भिन्नकान्त्यक्तवानित्यर्थः॥५५॥ तस्मादिति। नंदीगणाविशेषः तस्मै शिवाय प्रणिपत्य शिष्यप्र
परिचर्याहेतुना न्यपेतां आकांक्षे लसुतां गौरीं तस्मै शशंस। विज्ञापितवान्। भर्तुः शिवस्य स्तूदोपणमात्रेण अनुमतः अ
नुज्ञातः प्रवेशो यस्याः तां एनां पार्वतीं प्रवेशयामास। प्रावेशयच्च। तस्मादिति क्रियाग्रहणं कर्तव्यमिति चतुर्थी। शिष्यु
षयेतिलक्ष्मानुरूपं इति वता हेत्वर्थे तृतीया॥६०॥ तस्या इति। तस्याः पार्वत्याः सखीभ्यां विजयामालिनीभ्यां
कर्णीभ्यां स्वहस्तलूनः स्वहस्तेन च्छिन्नः पल्लवानां भंगैः छेदैः भिन्नः शिशिरात्ययस्य वसंतस्य पुष्पोच्चयः पुष्पा
णां राशिः अंबकस्य पादमूले प्रणिपातात्पूर्वं यथा तथाव्यकीर्यत विकीर्णः सखीभ्यां ईश्वरः हृदयपरिच्छेदा
पार्वत्याः पूर्वमेव पुष्पविकरणं कृतमिति सिद्धश्चत्वं यदित्यत्र हस्तादानेचरस्तेयेश्यनेनघन्ननभवति॥
भामान्यविवक्षया अचैंविधायपश्चात्पदांतरसंबंधात्॥६१॥ उमेति॥ उमापि नीलानामेलकानां मध्ये शोभि
तुंशीलं यस्य नवकर्णिकारं विभ्रंसयंती स्खलयंती सती कर्णाभ्यां च्युताः पल्लवाः यस्य तेन मूर्ध्ना करणेन
हृदयमद्धेनायशिवायप्रणामं चकार॥६२॥ अनन्येति। भवेन हरेण अनन्याभजनते अन्यनाकु सर्वनाम्नो हृ
त्रिमात्रे पुंलक्ष्मावः। नञ अन्यमानं कृतं पतिं आप्नुहि। लमस्वेतिसत्यमेवसापार्वती अभिहिता। हरः प्रणामानं
तरं तस्यै सत्यामाशिषं दत्तवानित्यर्थः। हि यस्मात् ईश्वराणां महापुरुषाणां व्याहृतयः वचनानि लोके कदा।

२९

विदपि विपरीतं अर्थं न पुंसां तासां ते यत्कथयंतीति तद्भवत्येवेत्यर्थः। श्रुविशासि गुणोनेत्यत्र ब्रुव्यर्थग्रहणात् अभिपूर्व

स्य धातोर्द्विकर्मकत्वं॥६३॥ कामइति॥ वह्निमुखं प्रवेष्टुमिच्छुः पतंगवत् शलभ इव कामस्तु मायाः अदृश्याः

समीपे समक्षं अव्ययं हरएव बद्धं दृढं तं लक्ष्यं स सन्बाणस्य अवसरं विमुक्तिप्रस्तावं प्रतीक्ष्य शरासनस्य धनुषः ज्यां

नारीं मुहुर्मुहुः आममर्श। आमृष्टवान्। पतंगो पक्षिसूर्ययोश्च त्वप्सरःशलभे। लक्षं लक्ष्यं शरव्यं चेत्यमरः॥६४॥ अथेति॥

अथ आशीर्वादानंतरं गौरी ताम्रारुनकांतिर्यस्य तेन करेण भानुमतः सूर्यस्य मयूखैः किरणैः विशोषितां आ

आत्मना नीरसीकृतां मंदाकिन्यां पुष्करबीजानां मालां तपस्विने गिरिशाय हराय उपनिन्ये प्रीत्यर्थमुपाढौकित

वती। तपस्विन इति शुश्रूषाद्योतनाय। ताम्ररुचेति पदं ईश्वरविकारद्योतनाय। मंदाकिनीति पावित्र्यद्योतनाय। गिरिशेति तद्

ति गिरिशः॥६५॥ प्रतीति। त्रिलोचनः प्रणयिषु भक्तेषु प्रियत्वात् वत्सलत्वात् तां मालं ग्रहीतुं उपचक्रमे प्रारमत्त च। पुष्पध

न्वा अवंध्यं अमोघं संमोहन इति प्रसिद्धं बाणं धनुषि समधत्त संहितवांश्च। चकारावेककालद्योतकौ। पुष्पं धनुर्यस्य सं

ज्ञायां धन्वादेशः पुष्पधन्वयस्येति वा। उपचक्रमइति प्रोपाभ्यां समर्थाभ्यामित्यात्मनेपदं॥६६॥ हर इति। चंद्रोदयस्या

रंभे सति अंबुराशिः समुद्र इव किंचित्परिवृत्तं व्याहतं धैर्यं यस्य हरस्तु बिंबफलवदधरोष्ठो यस्मिन् तस्मिन्नुमा

याः मुखे विलोचनानि व्यापारयामास। प्रेरितवान् विलोचनानीति बहुवचनेन आदरातिशयः सूचितः। तु शब्दः

नीचजनसादृश्यव्यः यथा चंद्रोदयसमये समुद्रः किंचिद्धैर्यं किंचित् ह्रीमौर्यं परित्यज्य द्वारमात्र मुद्वेलो न च जपि

कु॰टी ३

मर्यादातिक्रमं न करोति तथायमपीत्यर्थः। अनेन नरस्याख्यो भावः ईश्वरस्य सूचित इत्युक्तं॥ इत्यादि विवृण्वतीति॥ शैलसुता गौ
र्यः स्फुटंतीति विकस्वरीभवंती बालानि नूतनानि कदंबानि तत्सदृशैः जातरोमांचैरित्यर्थः। अंगैरवयवैर्भावं विवृ
ण्वती प्रकटयंती सती पर्यस्तप्रसारितविलोचनेन पर्यस्तेन चारुतरेण कामचेष्टासंबंधादिकसुंदरेण मुखेन साचीकृता
किंचित्तिर्यक्कृतमुखीत्यर्थः॥६८॥ अथेति॥ अथानंतरं त्र्ययुग्मनेत्रः शिवः इंद्रियाणां क्षोभं विकारं वशित्वात्
जितेंद्रियत्वात्पुनः बलवन्निगृह्य स्वस्य संवृतस्य विकृतेर्विकारस्य हेतुं दृष्टुमिच्छुः सन्दिशां पूर्वादीनामुपान्तेषु
प्रान्तेषु दृष्टिं ससर्ज॥ विक्षेपावलं विद्यते अस्मिन्नति हललवदिति निग्रहणक्रियाविशेषणं॥६९॥ सइति॥ स ह
रः ज्यायाः आकर्षणवशात् दक्षिणे अपांगे निविष्टा स्थिता मुष्टिर्यस्य तं नतो नम्रो अंसो स्कंधो यस्य तं आकुं
चितः ईषद्वक्रीकृतः सव्यः वामः पादो येन तं वक्रीकृतं वर्तुलीकृतं चारुः चापो येन तं प्रहर्तुमभ्युद्यतं कृतोद्य
मं आत्मयोनिं मदनं नवं ददर्श॥७०॥ तप इति॥ तपसः परामर्शो नाशः तेन विवृद्धो मन्युः कोपो यस्य भ्रूभंगः
भ्रकुटी तेन दुःप्रेक्ष्यं मुखं यस्य तस्य हरस्य तृतीयादक्ष्णः सकाशात् स्फुरन् ज्वाल्यमानः उदर्चिः उद्गतमर्चि
शिखा यस्य स कृशानुर्वह्निः सहसाकस्मात् किल निःपपात निर्ययौ॥७१॥ क्रोधमिति॥ हे प्रभो क्रोधं संहर
इति मरुतां देवानां गिरः यावत् खे आकाशे चरंति॥ तावत् भवस्य शिवस्य नेत्रजन्मा यस्य स वह्निर्म

३०

३०

दनं कामं मनस्येव अवशो बोधयस्य वकार यावद्वाङ् निस्सृता ततः पूर्वमेव ददाहेत्यर्थः। संहरेति प्रार्थने लोट्। संभ्र
मे द्विर्वचनं। चरतीति वर्त्तमाननिर्देशो दाहस्यातिक्षिप्रत्वप्रतिपादनार्थः। पदसंस्कारपक्षमाश्रित्य चरंतीति मुत्सा
द्यपस्थाद्वाक्यपरिकल्पना तु। स्वमा कालैषादि वि सुखवुद्धौ संवेदनेपुर इति। मरुत्सु सिरे मात इति च विश्वलोच
नः॥७२॥ तीव्रेति। रतिः तीव्रः दुःसहो भिषं मोदुःखं प्रनव उत्तत्ति स्थानं यस्य इंद्रियाणां चक्षुरादीनां वृत्तिस्तंभन
यता प्रतिविधूता मोहेन मूर्छया वा कृत्रो अज्ञातं भर्तुः कामस्य व्यसनं मरणं यया सा मुहूर्तं क्षणमात्रं कृतः उपकारो
यस्याः सेव वभूव। मूर्छा तु कश्मलं मोहः व्यसनं विपदि भ्रंशो इत्यमरः। मुहूर्त्तमिति कालाध्वनोरत्यंतसंयोगइ
ति द्वितीया॥७३॥ तमिति। वज्रः वनस्पतिं द्रुत्व इव तपस्वी नत्वपतिः शिवः तपसः विघ्नं कृतं कामं अवरुध्य स्त्री
णां संनिकर्षं सन्निधिं परिहर्त्तुमिच्छन् समूतः प्रथमगणसहितः सन्नन्तर्दधे इति रोदधे। कुशादिनी वज्रमस्त्री॥
ह्लादिन्यमरः। वनस्पतिर्विना पुष्पं फलिवृक्षो विपादप इति विश्वलोचनः॥७४॥ शैलात्मजेति॥ अन्यात्म
मिला शास्त्र न्याशैलात्मजा गौरी पितुर्हिमवतः अभिलाषं इश्वरायसुतां दामीत्येवंरूपं मनोर
थं आत्मनो ललितं सुंदरं वपुश्च व्यर्थं समीक्ष्य सम्यक्ष्यो: समग्रमिति च अधिकं जाता लज्जा यस्याः सा सती
कथं चित्क्लैशेन भवनस्याभिमुखं जगाम॥ गतवती वसंततिलकं वृत्तं॥७५॥ सपदीति। दत्तलग्नां पवि

नीविस्रस्तसुरगज इव वेगेन दीर्घीकृतानि अंगानि येन सो ऽङ्घ्रिः रुद्रस्य संरंभः कोपः तस्माद्भीतिः तया मुकु
लिते अक्षिणी यस्याः तां अत एव अनुकंपितुं अर्हां दुहितरं सपदि दीर्घया मादाय पंथानं प्रतिगता प्रतिपथा गत्य
त्यादयः क्रांताद्यर्थे द्वितीययेति समासः। अनकूपूर्वाद्वुरिति समासांतो ऽचारः। प्रतिपथा गतिर्यस्य स आसीत्।
मुकुलिताक्षीमिति बहुव्रीहौ। सकुचकृणः स्वांगात् षच्। षिद्गौरादिभ्यश्चेति ङीप्॥७६॥ इति श्रीमत्परमहं
हंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां कुमारसंभवटीकायां तृतीयः सर्गः ३॥ अथेति। अथा
नंतरं मोहपरायणा मूर्छापरायणा सती पतिव्रता कामवधूः कामस्य स्त्री रतिः असह्यं वेदनं दुःखं यस्मिन्
तत् नवं वृत्ततविधवायाः भावो वैधव्यं प्रतिपादयिष्यता दास्यता विधिना दैवेन कर्त्रा विवशा परतंत्रा
अत एव विबोधिता जागरिता क्षणेषु सुखदुःखहेतूनां दैवायत्तत्वात् तस्य छीनस्यायां सुखमनुभवं दुः
खं विदुःखानुभवार्थं प्रबोधं प्रापयतीत्यर्थः। मोहः परायणं मुख्यमाश्रयो यस्याः सा सती भवंतीति वा
रतिहृदृशवर्णं प्रबोधान्मोहस्याभिमतत्वं स्वतनार्थः। वैधव्यस्यानुभूतत्वं सुदुःसहत्वं स्वतनार्थं॥
परायणमभिप्रेततत्परे परमाश्रयपदे इति यादवः॥ भावधानदृति। सा रतिः प्रलयस्य मूर्छाया अं

तेऽश्रमो वेत्र मिषितेऽन्मीलिते विलोचने अवधान परे प्रियं कुसुमवद्धीतेव कार। अतस्यो
र्दर्शनोत्सुकयोस्तयोर्लोचनयोरत्यंतं विप्रं दर्शनं यस्य तं मृतमिति यावत्। प्रियं न विवेद। न
ज्ञातवती। यल घोरति कल्यां तन्मूर्च्छा सुविदित: पुमानिति विश्वलोचन४॥२॥ अपीति॥ अपि
जीवितनाथ आण नाथ कामजीवसीत्यभिधाय यकृत्थितयातयारत्या पुर: स्थिता पुरु
षस्य आकृतिरिव आकृतिर्यस्य तत हरिकोपानल भस्म केवलं ददृशे। दृष्टं न प्रियं दृत्यर्थः
अयीत्यत्ययं संबोधने वितर्के वा। पुरुषाकृतिस्थिता विति पाठे स्त्रीलिंगात: भस्मरूपा पु
रुषाकृति४ ददर्श दृत्यर्थ:॥३॥ अथेति॥ तथानंतरं सा रति: पुन: विह्वला तादृश पुरुषदर्शनात
विकले व वसुधायां: भ्रमरालिलिंगं वो ठनात संश्लेषण धूसरो स्तनो यस्या: सा विकीर्णा: वि
लुता: मूर्द्धजा: केशा: यस्या: सा सती स्थली समदु:खां कुर्वतीव विललाप। परिदेवनं कृतव
ती। स्थली स्थिता नायषा दु:खमुत्पद्यते। तथा विललापेत्यर्थ:॥४॥ उपमानमिति॥ हे प्रियतव
यत्करणं देह: कांतिमत्तया विलासिनामुपमानमभूत्। तदिदमीदृशीं दशां समररूपावस्थां गतं त्र

त्वं अहं न विदीर्यासि स्वयं विदीर्णहृदया न भवामि । कर्मणि कर्तरि वा दॄ विदारणे । स्त्रियः कठिनाः खलु खलु शब्दो
जिज्ञासायां अन्यथा इदमवलोकयंती कथं जीवामि । अतः सर्वाः स्त्रियः कठिनहृदया इति ज्ञातव्यमित्य
र्थः । करणांसाधकतमद्वे त्रगात्रे प्रियेषिति निजवाक्यालंकारजितातु न येषब्वितिचामरः ॥५॥ क
न्विति । हे प्रिय तव अधीनं जीवितं यस्याः तां मां विनिकीर्य परित्यज्य हत्वा नमिन्नं त्यक्तं सौहृदं प्रीतिर्ये
न पुमान् क नु विद्रुतः पलायितोसि कः कामिव । हतं खण्डितं सेतोर्बंधनं येन स जलसंघातः नलिनीं
पद्मिनीमिव । सोसोढत्वेनगासि संवृंते पूर्वपदस्य वेत्यनेनोभयपदस्य वृद्धिर्न भवति । अर्थवद्ग्रहणे नानर्थ
कस्येति परिभाषया अर्थवतो ग्रहणात् सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातनासमुदायस्यार्थ
वत्वात् । अत्र हृदष्टस्यानर्थत्वत्वात् । संज्ञापूर्वकविधेरनित्यत्वाद्वा ॥६॥ अपराधाज्ञमनमाशंक्याह
कृतवानिति । हे प्रिय त्वं मे विप्रियं न कृतवानसि मयापि ते प्रतिकूलं न कृतं विलपंत्यै रतये अकारण
मेव किमिति दर्शनं न दीयते रतये आत्मानं किमिति न दर्शयतीत्यर्थः ॥ अकारणमिति आभावे अव्ययी
भावः ॥ क्रियाविशेषणं वा । विलपंत्यै रतय इति परोक्षान्निर्देशः ॥ स्वात्मसौभाग्यप्रदर्शनार्थः ॥७ स्मरसी
ति ॥ हे स्मर यौ गोत्रस्य नाम्नः स्खलितं गुणविषयौ सपुमरवलागुणौः कांचीदामभिः बंधनं तत स्मरसि च्यु

ताश्च वैते केसराः किं जल्काः तेद्दृष्टि तेईक्षणे लोचनेयत्र अवतंसच्छतं कर्णाभरणं हितं अदुत्पलं तेन कृत्वा
ताडमानि वा स्मरसि। अमुतं केसरित्यादि स्यादिविलोचणं गोत्रस्खलनकारिणि मुखे दंडः हतइतिशेषः ना
र्थाः ८॥ हृदयइति हे प्रिये मम हृदयवससीति त्वं मम रत्याः प्रियपतं तेपदवी चः उक्ता चासि तत केतत
केकपटमवैमि। जानामि। इहेवचः उपचारपदं चेत तर्हि त्वं कथं मनंगः अहं रतिः कथं मम तता
हृदयेससीति वचनं यदि सत्यं स्यात्। तर्हि त्वं मिवाहमप्यंगरहिता स्यां। आधारनाशे आधेयनाश
स्यो वितत्वादिति भावः॥ अविविद्धति भुवो ब्विः लुङि॥ए॥ परलोकइति। हे प्रिय अहं रतिः पर
लोकस्य अभिनवप्रवासिनः तव पदवीं सरणिं प्रतिपत्स्ये। संप्रपिप्स्ये। अनुसरणात्त्व त्समीपं गमि
ष्यं गमिष्यामीत्यर्थः। तदानीमेव किं मिति नागतासि। तत्राह। एषजनोरतिलक्षणः विधिना मोहं ब्रि
रताइदेवेन वंचितः मया तव किं प्रयोजनं तत्राह। देहिनां प्राणिनां सुखं त्वदधीनं त्वदायत्तं खलु॥ न के
वलं ममैकस्याः त्वदधीनं सुखं किंतु वै सर्वेषामिति भावः॥ एवामस्यनव त्वं मार्गान्वेषणे लोक पि
र्थं॥१०॥ रजनीति। हे प्रियप्रजन्यां रात्रौ तिमिरेण अंधकारेण अवगुंते आच्छादिते पुरस्य मार्गे घ
नस्य घनस्य शब्दो गर्जनात् विलोलवा[illegible] ता[illegible]श्रियाः अभिसारिकाः कामिनां गृहं वसति प्रस्था

कुरी
३२

पयितुं त्वदृते त्वां विना क ईश्वरः प्रभुः न कोपी त्यर्थः। त्वयि सति अंधकारं गर्जनमयं वा नवेस्य स्व
यमेव गच्छंतीत्यर्थः॥ त्वदिति अन्यारादि त्यादिना पंचमी। वसती रात्रिवेश्मनो रित्यमरः॥१३॥ भ्र
मयेनेति हे प्रिय त्वयि असति अधुना अहं एणनिनयनानि घूर्णयन् तरलयन् वचनानि पदे स्खल
यन् अविस्पष्टयन् वारुण्या सुरया मदः मत्तता प्रमदानां कामिनीनां विडंबनां न तसीना। त्वयि विद्य
मान एव मदादयः शोभंते तत्ति नाव ॥१४॥ अधिगम्येति। हे प्रिय अनंग प्रियस्य आसौ वंधुश्च तस्य त
व वपुः कथीकृतं कथनीयतां गतां मृत मित्यर्थः॥ अधिगम्य ज्ञात्वा निष्फलोदयः सन् निश्वान
रस्थेदुः तनुतां कृशतां दुःखं कथं यथा तथा भोक्ष्यति। चंद्रोदयस्य उत्कंठाजननादिकं तव
त्वयि विद्यमान एव संभवति। नान्यथेति भावः। अनंगेति संबोधनं कशोषत्व सूचकं॥१५॥ हरि
तेति। हरितः हरिद्वर्णः ईषल्लोहितः अत एव चारु मनोज्ञः पल्लवोपचकलेन मंद्रेण पुमां
श्चासौ कोकिलश्च तस्य शब्देन सूचितः व्यंजितः पल्लवभंगेन मधुरत्वजननात्। मधु
रस्वरेण पल्लव इत्यन्न इति ज्ञात इत्यर्थः नवश्चासौ चूतस्य प्रसवः अंकुरश्च। संप्रति कस्य बाण
तां गमिष्यति वद। अन्योपि बाणः हरितरुणा चारुपद्मः बाणसहितश्च भवति॥१५॥ अनीति। हे प्रिय पल्ल

३२

33

याधनुषः गुणकत्वमौर्वी रुते कत्वा गुरुशोकां गुरुः कार्ये अनेकशः निरोपिता आरोपिता इ ... आलीनां भ्रमराणां पङ्क्ति
करुणास्स्वरकाः स्वराः। यत्र ते विकृते हत्वा गुरुशोकां गुरुः शोको यस्याः तां मां अनु पश्चात् रोदिती व कन्दती वा विन
तैः करुणैः इति वा पाठः। मयि तत्प्रयोगा नावेनह्यतेहाभावे पि अलिपङ्क्ती उपयोगस्याभावेन स्नेहः कर्तव्य इति भा
वः॥१५॥ प्रतीति। पुनरपि मनोहरं वपुः प्रतिपद्य उपेतः सन् मधुरेषु आलापेषु तावदादिश। केतादिमानां अ
नुनेतुं दूतीमिव कोकिलां हरं वपुः प्रतिपद्य उपेतः सन् मधुरेषु आलापेषु तावदादिश। केतादिमानां अनुनेतुं दूतीमि
व कोकिलां कितावत् आहितो भीति भावः। दूतिपदे षितिस्थापो ह्रिहितिदूस्वः॥ तावदिति वाक्योपक्रमे॥१६॥ शि
रसेति। हे स्मर शिरसा प्रणिपत्य याचितानि सवेपथूनि सालिकनावात्सकंप सहितानि तेववरहसित उपगूढानि
आलिंगनानि च तानि अनुवेक वेद्यानि सुरतानि संस्मृत्य रतिरेव धमानायाः मम शांतिर्नास्ति। सुरतानि स्मृतेन
कर्मणिव षष्ठीनन्नवति। शेषविवक्षायां अनावात्॥१७॥ रचितमिति। हे रति पंडित कामत्वया स्वयं मम अंगेषु वरि
तं निवेशितं आर्तवं वसंतसंबंधि कुसुमप्रसाधनं पुष्पशृंगारः ध्रुवं एतत् तिष्ठति। ध्रुवं अवस्थाने। तव पुनः तत्सदृ
शं वारुवपुर्न दृश्यते क्षणमात्रेसर्वात्मना विनष्टं शरीरं पुष्पं तु वर्तते। अतः पुष्पादि असारं शरीरमिति भावः॥१८॥
विबुधैरपि। हे प्रिय यतः यस्मात् यस्य करण ... अथ रिसमाप्तिसत्वेवदारुणेः। मिषापैविबुधैर्दे

कुरी
३८

वैष्ठस्य तोसि तेदिदं दक्षिणेतरं वामं मे चरणं निर्मितरागं रवितालक्तकं कलौ हि सं कुरु। एहि आगच्छ। आडुर्वेदा
णगतौ। दक्षिणेमिलनेनस्त्रीणां दक्षिणं गात्रवामांगस्पर्शेनाप्यस्यालंकृतं। दारुणत्वं च देवानां प्राणान्तक
रणे कर्मणि विनियोगात्परिकर्मांगसंस्कार इत्यमरः॥१९॥ अहमिति॥ हे प्रिय अहं पतंगानां शलभानां व
र्त्मना विनाशकालमार्गेण अग्निप्रवेशेनेत्यर्थः एत्य आगत्य पुनः अंकाश्रयणी भवामि। दिवि स्वर्गे चतुरैः
सुरकामिनीजनैः यावन्न विलोभ्यसे विलेभ्य आत्मसात्क्रियसे तावदित्यध्याहारः लुब्धो विमोहने कर्मणि। द्यौः
दिवौ द्वे इत्यमरः। पतंगो पक्षि सूर्ये च। पतंगविह्नयोरं कः॥२०॥ मदनेति॥ हे रमण त्वां यद्यप्यनुयामि। अनुपश्चा
मि। तथापि मदनेन विनाकृतेण मात्रं रतिः अहं ताकिल जीवितेति इदं वचनीयं निंदामेव व्यवस्थितमेव विनाकृतेति
पाठ मदनेन विनाकृता हव्यगच्छतासतीत्यर्थः। अनुयामीति वर्तमानसामीप्ये लट्॥२१॥ क्रियतामिति॥
परलोके नवान्तरितस्य व्यवहितस्य मृतस्येत्यर्थः। तव अन्त्यमेडनं मरणसमयभूषणं मम यारस्याक
यं क्रियतां। अंगेन शरीरेण च जीवितेन च सममेव युगपदेव अतर्कितां अनूहितां गतिं दशां गतः प्राप्तो सि
अन्यस्य मरणे शरीरं तिष्ठति। तव तु न तथेत्यर्थः। क्रियतामिति विशेषाति सर्गपात्त कालेषु कृत्यार्थे ति लोट्।
स्वयमेव गन्तासीति पाठे पूर्वं यत्र गतासि तत्र समपार्द्धमेव गतोसि। इदानीं यथा विनैव गतवानसि। अंगेने

३४
१०

निवर्त्स्यजीवितेनेति निवर्तने पुनरागमनात्तावान्मेऽत्र नस्यात् शरव्यकरणत्वमुक्तं ॥२३॥ रुजतामिति । हे प्रि
य उत्संगे निषण्णमारोपितं धन्वधनुः यस्य शरं ऋजुतां शरलत्वं नयतः पश्यतस्ते तव मधुना वसंतेन सह स
सस्मितां कथा नयनस्य उपांते न विलोकनानि च स्मरामि ॥२४॥ क्वनु इति । हे प्रियते हृदयंगमः प्रीतः सख्या
कुसुमैः आयोजितं विरचितं कार्मुकं येन स सममधुः वसंतः क्वनु कुत्र वर्तते ॥ स वसंतोऽपि उग्रारुट्कोपाय
स्य तेन पिनाकिना शंभुना सुहृदा कामेन गतां प्राप्तां गतिं दशां न गमितः न प्रापितः खलु सोऽपि हरेण दग्ध इ
त्यर्थः । काकुस्वरेण नञ् योज्यः नु प्रश्ने गमनार्थे चेति रवत्र । अरुहि बदितिनुमहा ल खलु निशामायां ॥२५॥ अथे
ति । अथैतद्वचनानंतरं वधूर्वसंतः दिग्धफलैः विषदिग्धलिप्तशरमुखैरिवातैः पूर्वोक्तैः परिदेवितास
रैः हृदये अर्दितः विद्धः सन् आतुरां दुःखितां रतिं अभ्युपपत्तुं आश्वासयितुं पुरः आत्मानमदर्शयत् दि
ग्धाक्ते दिग्धलिप्तकौ अभ्युपपत्तिरनुग्रहः । विलापः परिदेवनमिति चामरः ॥२६॥ सा रतिस्तं वसंतमवेक्ष्य
भृशां रुरोद । स्तनौ संबाध्य पीडयित्वा वक्षसि तिष्ठतीति ... उरो घ्नाना ताडितवती ॥ हि यस्मात् स्वजनस्य अग्रे

कु॰टी॰
३५

तः दुःखं विहृतं तद्द्वारं इतिं द्वारं यस्य तद्विवोपजायते॥ ध्वा इतीति। दुःखिता रतिः एनं वसंतं इत्युवाच वा। किमि
ति हे वसंत स्य किं स्थितं कुत्सितमवस्थानं पश्य। किं स्थितिमिति पाठे कुत्सिता स्थितिः तां पश्येत्यर्थः। यदिदं पुर
स्थितं कपोतवत्या राव तवत कर्बुरं शबलं भस्म पवनैः कणशः कणं कणं सन् प्रकीर्यते। इतस्ततो विक्षिप्य
ते कणश इत्यल्पार्थे शस्॥२७॥ अथी ति। अथि स्मरसंप्रति दर्शनं देहि एवमाधवो वसंतः पर्युत्सुकः। तव
दर्शन इति शेषः॥ ख्वत्तः अस्य को विशेषः। ख्वतः अस्य को विशेषस्तत्राह। स्त्रैणं प्रेमदयितासु वल्लभासु अनव
स्थितं अस्थिरं। सुहृज्जने प्रेम न चलं नास्थिरं॥२८॥ अमुने ति। ननु कामपार्श्ववर्त्तिना अमुना संतेन स
सुरासुरं जगत् विसतंतुर्गुणो नानी यस्य पेलवपुष्पपत्रिणः शराय स्य तस्य धनुष आज्ञां कारितं वसंतेन
कर्त्ता जगत्त्रयोऽपि कर्त्तृ धनुष आज्ञां कारितं। यत्तु दत्तेन देव दत्तोघ तेरं कारित इति वत्। जगत्कारि
तम्। स्त्रत्रहे कौरन्यतारस्यामिति जगतः कर्मत्वं पेलवपुष्पपत्रिण इत्यनेन धनुषो दौर्बल्यं सूचितं॥२९॥
गत एवेति। हे वसंत ते स सकामः अनिलेन आहतो दीप इव गत एवमृत एवेत्यर्थः। अत एव न निवर्त्तते। अ
हं घस्मर नरूपस्य दीप स्यदशोवर्त्तीव वर्ते। स विषमेन दुःखमसनेन दुःखेन घ्रचूर्पितां वाधितां मां पश्य

३५

धूपसंतापेतु दशापन्नेनु व्यसनेन द्दतस्ततः प्रहृणेत्यर्थः॥३०॥ विधिनेति। नमुवसंतकामवधेमां विमुंचता विधिनाहि हे वे
नविश्वासतीति विशसः हिंसकः शसु हिंसायां॥ पचाद्यच्। विशसस्य कर्म वैशसं व्य ईं च तत्वैशसं च तत्कृतं। अत्र हेतु
माह। अनयाधिनिरुद्ध्यमद्रुमेणाञ्जेन नप्ने सति वल्लरीलतापतनाय पतितुं योग्या न वति। तुमर्थाच्च भाववचनादिति
चतुर्थी। आधारबाधे हि आधेयबाधस्यावितमिति भावः॥३१॥ तदिति। तत्तस्मात्कारणात्त्वमनुमृतिसर्जनात्
त्वदानात्पत्युः कामस्यात्यंतिकं समीपं प्रापय। स्त्रीणामनुमरणेन पतिलोकस्योक्तत्वादिति भावः॥३२॥ अनुमर
णानुत्वरणं तत्राह। शशिनेति। विचेतनैरपि अज्ञैरपि प्रमदाः स्त्रियः पत्युः वर्त्मगच्छंतीति प्रतिपन्नं ज्ञातुं कुतो ज्ञातं
तत्राह। हि यस्मात्कौमुदी ज्योत्स्ना शशिना सह याति तिरोधत्त इति विद्युत् मेघेन सह विलीयते न पश्यति॥ लिम्पलेपणे।
दिवादिरात्मनेपदी।॥३३॥ अमुनेति सुभगेन सुंदरेण मुना प्रियस्य गात्रभस्मनैव कषायितौ लिप्तौ सुरभी हे
तौ वास्तनौ यस्याः सा रती नवपल्लवानां संस्तरे पद्याविभावसावग्नौ न नु देहं स्वापयिष्यामि। निद्रे स्वापामि। स्वप्र
तिपन्नेकषायस्तुवरोन स्त्रीनिर्ज्ञासे रंजकाथमनि। सुरभावपटौ लिप्तेनावनां योर्न विलुतहृतिः। पूषादृद्वार्थे।
अमुनैवत्सेवकारो नस्त्रव्यतिरिक्तालंकरणाभिर्वृत्तः॥३४॥ कुसुमेति। हे सौम्य वसंत तल भावयाः रतिकामयोः कुसु

कु॰टी॰
३६

मास्तरणे पुष्पशय्यायां बहुशः सहायतां गतः साहाय्यं कृतवानसि संप्रति तावदाशु मे प्रणिपाताय अंजलिना पारचितां चितां
श्वरवना विशेषं कुरु तावदित्यवधारणे। यावन्नाकबुसा कल्पे वधो मध्येवधारण इत्यमरः ॥३५॥ तदनु इति तदनु
तापेणानन्तरं समर्पितं ज्वलनं हग्निं दक्षिणवातानां वीजनैः क्षेपणैः त्वरयेः स्मरः मां विना क्षणमपि स्थातुं नाह
हते। स्थातुं न शक्नोति तथा तेन या विदितं खलु तातमेव। पश्चात्तदनु पश्चादर्थे अव्ययीभावः। मां विनेत्यत्र योदा
पि इत्यपेतद्वत्यपिशद्वात् विनाशब्दे पि द्वितीयापृथग्विनानानाभिरिति योगविभागात् द्वितीया॥३६॥ इतीति। इ ति
चित्वादिकं विधायापि नो आवाभ्यां रतिकामाभ्यां एव स्वसलिलस्यांजलिर्दीयतां। यद्यस्मात्कारणात् तेसवांध
वः कामः मया सहितः सन् परत्रपारलोके अतिमत्स्य अखंड पिबजलां जलिं पास्यति। आगम्याभित्यस्य चतुर्थी द्विवचनं
तस्य स्थाने नौ इत्ययमादेशः। चशब्दः समुच्चये अपिशब्दः कामचारे॥३७॥ परेति॥ हे माधव वसंत परलोकविधौ पर
लोकविषये कृत्ये स्मरमुद्दिश्य विलोलपल्लवाः विलसत्किसलयाः सहकारस्य चूतस्य मंजरीः वल्लरीः निवपेः दद्याः॥ हि
यस्मात् ते सखा कामः प्रियचूतप्रसवः प्रीताम्रकुसुमः। प्रीतोद्देशेन पद्दानं संनिवापः॥३८॥ इतीति। आकाशंजावासरस्वा
ती अशरीरवाकू देहस्य विमुक्तये त्यागाय स्थितां कृतनिश्चितां पां रतिं अन्वकंपत। अन्वगृह्णात्। का कामिव। प्रथमा वृष्टि
हृदस्य जलप्रायस्य शोषेण विह्वलां समानु ... शफरीमिव। आप्प्यतुशापकरां द्वयोरिसमन्दः। भवतीति त

३६

३६

वापवाद्य शब्दरूपेण॥ कुसुमेषु। हेतुं सुमायुधपत्तिरतेतवकर्त्तौ कामः विराङ्घुर्लभोदुः आप्योनन विष्यति। अविरेणैव त्वयाप्राप्यत

रूपधीः। सकामः हरस्य लोचनाग्निविनेत्रा ग्निशिखायां शायेन कर्मणाशलभत्वं गतः। तन्नुरूप॥ अपराधेनैवासौ मृतः न त्वायुषः क्षय

इतिभावः।४०। अजितं लक्षमिति। उदीरितानि चलितानि इन्द्रियाणि यस्य स प्रजापतिः ब्रह्मा स्वसुतायां अभिलाषमकरोत। अ

थानंतरं तेन ब्रह्मणा विक्रियां निगृह्य अभिशप्तः सन् कामः एतत्फलं देहदाहरूपं अन्वभूत। कदाशापमोक्षं ऽऽव्रवान् प्रजापति

रित्यपेक्षायां आह॥४१॥ परिणेष्यतीति। तपसा स्ववशीकृतः पार्वत्यां प्रक्षीरः हरः यदा पार्वतीं परिणेष्यति तदा उपलब्धसुखः

सन् स्मरं त्वेन वपुषा नियोजयिष्यति। शापदानानंतरं कामेन प्रार्थितः सन् ब्रह्मा इत्थं शापान्तं दत्तवानित्यर्थः॥ प्रवणाञ्ज

कमनिम्नो व्रीप्रहेना नुचतुष्प्र इत्यमरः॥४२॥ ब्रह्मणा शापोदक्तः तेनैव शापान्तोदत्त इति। रडमित्यासो वचन॥

इतिचेति। पूर्वोक्तप्रकारेण स्मरशापान्तं वदा सरस्वती अशरीरवाक्करूपमाणं स धर्मे वारिलीका मपत्नीं रतिं आह॥

क्लित्तेदित्यपेक्षायामाह। वशिनः जितेन्द्रियान्सन्अनुधरामेत्राश्च अयाने अम तस्य वज्रमेयोः योनयः कारणं वशि

नः अयाने रित्यनेन ललितकोपस्य कारणं अमृतस्यत्यनेन लक्षितस्य प्रसादस्य कारणं। मेघापक्षे वायव का वेवारा

न्मृतशाद्वोऽम्भ तमुदकं मदनं तथा शान्नवतः प्रजापतेः रूपं प्रसार इतिरतेराशंकानिराशायअशरीर

कु॰टी
३७

वाण्यम्रवमुक्त्मितिभावः॥४३॥ तदिति॥ तत्तस्मात्कारणात् हे शान्तनेभावितव्यः प्रियेण संगमो यस्य तदिदं वपुः परिरक्ष॥ रविणापीतजलंयस्याः सानदी तपस्यनिदाघस्य अत्यये अन्तेपुनः ओघेन जलौघेन युज्यते॥ युक्तोभवतिकर्मकर्त्तरिशिनिदाघेन्त उपगममतुम्न ऊष्मागमस्तपइत्यमरः॥ ओघोद्वंदेंमसात्यये। भावितव्येतिअंतर्भावितण्यर्थत्वात्कर्मणितव्यप्रत्ययः॥ कृत्यल्युटोवहुलमितिवहुवचनाद्वाकर्त्तरितव्यप्रत्ययः॥ भूप्राप्ताविति स्माद्वाकर्मणितव्यप्रत्ययः॥४४॥ इत्यमिति॥ अदृश्यरूपेणविज्ञातअविशेषस्यरूपंकिमपिभूतंसत्वंकर्त्तइत्यं उक्तप्रकारेणरतेःस्मरणस्यवसायःउद्योगःतद्बुद्धिंमंदीचकार। शैथिलीचकार। तत्प्रत्ययात्तस्मिन्भूतेविश्वासात्तनुसुमायुधवंधुर्वसंतश्चमुचरितः अर्थ्यायैः तानिपदानियेषुतैर्वचोभिःएनांरतिंम्राश्वासयन्म्राश्वासितवान्॥भूतंस्यान्न्यायसत्वयोरितिविश्वः॥स्मरव्याल्पादुनिर्भाग्यामंदाइत्यमरः॥ प्रत्ययोधीनशपथज्ञानविश्वासहेतुषु॥ वसंततिलकंछंदः॥४५॥ अथेति॥ अथानंतरंव्यसनेनदुःखेनकृशामदनवधूरतिःशापस्यअंतं अवसानंप्रतिपालयांचकार। प्रत्यैक्षत। कामिवादिवानाथः दिवातनःतस्यप्रतिमाः किरणानांपरिक्षयेण धूसरामलिनांरजनीमुखंनिशामिव। प्रदोषोरजनीमुखं। अत्र रात्रिरित्यर्थः॥ पुष्पिताग्रानामछंदः॥४६॥ इति

३७

३८

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थविरचितायां कुमारसंभवटीकायां चतुर्थः सर्गः॥ ॥ तथेति। पार्वती त
था तेन प्रकारेण समक्षं प्रत्यक्षं मनोभवं कामं दहता पिनाकिना शंभुना भग्नः मनोरथः मे भर्ता स्यादित्येवंरूपः
अभिलाषो यस्याः सा सती हृदयेन चित्तेन रूपं सौंदर्यं निनिन्द अनर्थितवती॥ किमिति निनिंदेत्यत आह। तथा
हि। चारुता सौंदर्यं प्रियेषु विषये सौभाग्यफलं यस्याः सा सौभाग्यमत्र वाल्लभ्यं। हि शब्दो हेतौ। वंशस्थवृत्त
मस्मिन्सर्गे॥१॥ इयेषेति। सा पार्वती समाधिं नियमं आस्थाय तपोभिः वक्ष्यमाणव्रतविशेषैः कृत्वा आत्म
नः अवंध्यं सफलं रूपं यस्याः तस्याः भावस्तत्ता तां कर्तुं इयेष। आचकांक्ष। किमिति लोकोऽपि करे तपसि प्रवृ
त्तिस्तत्राह। अन्यथा एवं न चेत् तद्द्वयं कथमवाप्नोति। किं तद्द्वयं। तथाविधं अर्द्धशरीरं प्राप्त्यादि प्रेम तादृशः
त्रैलोक्यकर्ता पतिश्च यद्दुष्करं यद्दुरापं यद्दुर्गं यच्च दुस्तरं। तत्सर्वं तपसा प्राप्यं तपो हि दुरतिक्रममिति। स
माधिं नियमं ध्यानं॥२॥ निशम्येति। गिरीशे ईश्वरे प्रतिसक्तं मानसं यस्याः तां सुतां तपसे कृतोद्यमां निशम्य श्रु
त्वा मेना महतः मुनिव्रतात् तपसः एनां सुतां निवारयंती सती सती वक्षसा परिरभ्य आलिंगनेनानुनीय उवाच। निशम्य समु
त्वेत्यध्याहृतिशेषः। व्रतस्य मेनायाः अनीप्सितत्वाद्वारणार्थानामीप्सित इत्यपादानत्वं न स्यात् तस्मान्निवारय
ती अपगतपत्नीति व्याख्येयं॥३॥ मनीषिता इति। मनीषिताः अभीष्टिताः देवताः इंद्रियाणि वा गृहेषु अस्मदीये

कुटीषु संतिष्ठेहे वत्से तपः क्व तावकं तव संबंधि वपुः क्व। अयोग्यत्वं दृष्टान्तेन द्रढयति। नवं शिरीषपुष्पं कर्त्तृ भ्रमरस्य
पेलवं मृदु पदं सहते। पतत्रिणः पक्षिणः पुनर्न सहते। पतत्राणि पक्षाः अस्य संतीति पतत्री च पतत्रं च तनूरुहमि
त्यमरः॥४॥ इतीति। इति ध्रुवेच्छां सुतां अनुशासती मेना उद्यमात् तपः कारणरूपात् नियंतुं निवारयितुं न शशा
क। उक्तमेव अर्थान्तरन्यासेन द्रढयति। ईप्सिते अर्थे स्थिरः निश्चयो यस्य तत् मनः। निम्नाभिमुखं पयश्च
कः प्रतीपयेत् निरुंध्यात्। व्यावर्त्तयितुं शक्नुयादित्यर्थः॥५॥ कदाचिदिति। कदाचित् मनस्विनी सा पार्वती आ
सन्नयाः सख्याः तस्याः मुखेन मनोरथज्ञं मनोरथश्चेद्दुर्वार इत्यभिज्ञं पितरं फलोदयः अन्तः अवसानं यस्य पूर्वं न
मनस्य मनोरथस्य समाधिः समाधानं तदर्थं आत्मनः अरण्ये निवासमयाचत। मनस्विनी प्रारब्धं न परित्यजति इति
विजानतीया चिह्निकर्मिकः॥६॥ अथेति। अनुरूपश्चासावभि आग्रहस्तेन तुष्यतीति तेन गरीयसा महाशयेन गुरुणा
पित्रा कृताभ्यनुज्ञा गौरी पश्चात्तपश्चरणानन्तरं तस्य आख्या गौरीशिखरमिति नाम तया प्रजा सुप्रथितं प्रसिद्धं शिखं
डिनः मयूराः अस्मिन् संतीति शिखण्डिमत् शिखरं जगाम। शिखण्डिमदिति विशेषगुणं दुष्टसत्वरस्त्वनार्थं॥७॥ विमुच्येति।
आहार्यहर्तुं निवारयितुमशक्यः निश्चयो यस्याः सा गौरी विलोलाः चंचलाः याः हारयष्टयः मौक्तिकपङ्क्तयः ताभिः प्रवि
लुप्तं चन्दनं अंगरागो येन तं हारं विमुच्य परित्यज्य बालस्य अरुणः सूर्यस्य तद्वत् बभ्रु कपिशं पयोधरयोः स्त
नयोरुत्सेधेन उच्छ्रायेण विशीर्णा विगलिता संहति [illegible] बन्धो यस्य तत् वल्कलं बबन्ध॥८॥ यथेति॥ तस्याः

र्यः आननं मुखं प्रसिद्धे अमलं कृते निरोरुहैः कचैः यथा मधुरं सुंदरम नरता एवमेव जटानिरपि मधुरमरकत्वात् पंकजे षट्पदश्रेणि मिरेव न प्रकाशते। कुं तु सशैवलासंगमपि शैवलव्याप्तमपि शोभत इत्यर्थः। प्रसिद्धो ख्यातभूषितौ। स्वादुप्रियौ मधुरा विति चामरः॥ ९॥ प्रतिक्षणमिति। सा गौरी प्रतिक्षणं क्षणे क्षणे कृता रोमविक्रिया रोमांचोयया तां द्विगुणां त्रिरावृत्तां यां मुंजस्य विकाराः मौंजी व्रतायवभार ववंधेत्यर्थः॥ तदेव ववंधनं यस्मिन् कर्मणि तत्तत् पूर्वनिवद्धया तया मौंज्या कत्रीं अस्याः गौर्याः रसनागुणस्य कांचीदाम्नः आस्पदं स्थानं कटिप्रदेशः सरागं लोहितमकारि कृतं ॥१०॥ विसृष्टेति॥ विसृष्टः परित्यक्तः रागः लाक्षादिरागो यस्य तस्मादधरोष्ठात् स्तनयोरंगरागेण कुंकुमलेपादिना अरुणितात् करतलौ हित्यात् कंदुकाच्च निवर्त्तितः निवारितः। कंदुकः पवनसमये करेण छाजातेत्यर्थः॥ ११ महीति। या गौरी महार्हेशय्यापरिवर्त्तनेन च्युतैः स्वकेशपुष्पैरपि दूयते स्म। आखिद्यत॥ दूङ् परितापे। लट् स्मे इति भूतेऽर्थे लट्। सा शय्याच तस्याः परिवर्त्तनेन च्युतैः स्वकेशपुष्पैरपि दूयते। सा गौरी केवले स्थण्डिले आघावरणरहिते भूभागविशेष एव बाहुलतामुपधातुं गेंडुकीकर्तुं शीलं यस्याः सा सती निषेदुषी निषण्णा सती अशेत। सुप्ता पशिरसः स्थापनार्थं उन्नतं वस्तु उपधानं। १२॥ पुनरिति। नियमस्थायाः तया गौर्या पुनर्वहीतुं निक्षेप इव द्वयीषु द्वयमर्पितुं। कासु किं तद्द्वयं। तन्वीषु कृशासु लतासु विलासचेष्टितं हरिणांगनासु विलोलदृष्टिश्च द्वावि... १३॥ अतंद्रितेति। सा गौरी अतंद्रिता अनलसा समयवीयस्याः साद्वयी आविर्भूताव यवसमुदायपल्लवसमुद्भववनं।

तौ स्वयमेव आत्मनैव घटावेव स्तनौ ताभ्यां प्रस्रवैरुपाघ्नैः। इति घटस्तनप्रस्रवणाललालितैः कृत्वा अल्पवृक्षाः
वृक्षकाः तान् व्यवर्द्धयत् वर्द्धितवती। गुहोपि स्कन्दोपि प्रथममाप्तं प्राप्तं जन्म यैः तेषां वृक्षाणां पुत्रवात्सल्यं नापाक-
रिष्यति। नापनेष्यति। नापनीतवानित्यर्थः। वात्सल्यपदेन पुत्रस्नेहे अवगम्यमानेपि पुत्रशब्दप्रयोगः करिकलभवद्द्रष्ट-
व्यः। धातुसंबंधे प्रत्यया इति वचनात् साधुः॥१४॥ आरण्येति। आरण्याद्भवंतीति आरण्या। निवीजानि नीवारादीनि तेषां
अंजलेः दानेन लालिताः पोषिताः हरिणाः तस्यां गौर्यां विशश्वसुः। विश्वासं गताः। यथा तदीयैः मृगसंबंधिभिः
नयनैः पुरः अग्रे सखीनां लोचने कुतूहलात् अमिमीत। एतस्याः सख्याः एतन्मृगनेत्राभ्यां समाने इति मितवती लोच-
ने इति ज्ञातो द्विवचनं। सखीनां पुरः आत्मीयलोचने अमिमीतेति वा। अमिमीत वा कृतालो। लङ्॥१५॥ कृतेति। ऋ-
षयः द्रष्टुमिच्छवः सन्तः अभिषेकः स्नानं यया हुतः जातवेदाः अग्निर्यया त्वक्वल्कं त्वक्स्त्री वल्कं वल्कलमस्त्रि-
याम् इत्यमरः। वल्कलं उत्तरासंगः उत्तरीयं यस्याः अधीतिनीं कृताध्ययनां तां पार्वतीम् अभ्युपागमत। अभ्युपा-
गताः ऋषयः कुमारीं द्रष्टुं कथमागता इत्यत आह। धर्मेण वृद्धेषु वयः शैशवादि नं न समीक्ष्यते। धर्मवृद्धो रव
गौरवहेतुत्वात्। तथा चोक्तं। न तेन वृद्धो भवति येनास्य पलितं शिरः। यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः।
अधीतमनया अधीतिनी इष्टादिभ्यश्चेति इनि प्रत्ययः॥१६॥ विरोधीति। तत्तपोवनं विरोधिभिः नित्यवैरिभिः सत्त्वैः जन्तुभि-
श्च तैः उज्झितः परित्यक्तः जातिस्वतः विरोधो यत्र द्रुमैः अभीष्टप्रसवैः अभिलषितपुष्पैः करणैः अर्चिताः
अतिथयो यत्र नवा ये उटजास्तेषां पर्णशालानां अन्तः संभृतः अनलः अग्निर्यत्र एवं सत् पावनं बभूव। मत्सरोन्य-

39

39

श्रुतद्वेषे मात्सर्ये क्रुधिमत्सरः इति विश्वः ॥१७॥ यदेति। सर्वसमा सर्वन्न समा सा पार्वती यदा तावता तावत्प्रमाणेन
समाधिना कांक्षितं फलं लभ्यं नामं ह्यानन्ज्ञातवती। तदा स्वशरीरस्य मार्दवं मृदुत्वं अनपेक्ष्य महत्तपश्चरितुं प्रचक्र-
क्रमे। उपक्रांतवती ॥१८॥ क्लमेति। या कंदुकलीलया पि क्लामं भ्राम्यितं नययो। तदा मुनीनां चरितं व्यगाहत। अध्य-
ध्यवते। अस्याः वपुः कांचनपद्मस्य धर्म इव धर्मो यस्य तत्तथा कं विनिश्चितं। तत्र हेतुमाह। यद्यस्मात्कारणात् प्रकृत्या म-
दूपि ससारमेव च ॥१९॥ शुचाविति। शुचिस्मिता निर्विकारा सुमध्यमा सा गौरी शुचौ ग्रीष्मऋतौ चतुर्णां मध्यगता सती
नेत्रैः प्रतिहंती तिनेत्र प्रतिघातिनी तां प्रभां विजित्य अनन्यदृष्टिः सती सवितारं सूर्यं ऐक्षत। तथा च मनुः। ग्रीष्मे पंच
ग्निमध्यस्थो वर्षासु स्थंडिलेशय इति ॥२०॥ अथेति। सवितुः सूर्यस्य मरीचिभिः किरणैः तथा तेन प्रकारेण अतितप्तं तदीयं प-
द्मि मध्यस्था वर्षा सुस्थंडिले शय इति। सवितुः सूर्यस्य ... वैती संबंधि मुखं कमलस्य श्रियं शोभां दध्यौ। केवलं दीर्घयोः अस्य मुखस्य अपांगयोः नेत्रोपान्तयोः शनैः शनैः श्यामत्व-
वैती संबंधि मुखं कमलस्य श्रियं शोभां दध्यौ। केवलं दीर्घयोः अस्य मुखस्य अपांगयोः नेत्रोपान्तयोः शनैः शनैः श्यामत्व-
भावः श्यामिका तया श्यामत्वेन पदं आस्पदं हृतं। श्यामत्वं कालिमानं पेनमानयोः अपांगयोः केवलं पदं चकार। नान्यत्रेति म-
॥२१॥ अयाचितेति। अयाचितमप्रार्थितं सन्नुपस्थितं आगतं अंबु चरस्पते अस्वाद्यत इति रसः अमृतं दामकस्य तदुपते श्च द्रु-
॥२१॥ अयाचितेति। अयाचितमप्रार्थितं सन्नुपस्थितं आगतं अंबु चरस्पते अस्वाद्यत इति रसः अमृतं दामकस्य तदुपते श्च द्रु-
स्य रश्मयश्च तस्याः पार्वत्याः व्रतपारणाविधिः व्रतसमाप्तिविधिर्बभूव। उडुपस्य इति ओषधीवनोपायः तस्यः वाति स्त्रि-
अधिकं अन्यद्वा साधनं उपायो यस्य स न बभूव। यथाऽऽहारणं अयाचितोदकं श्च इकिरणाश्च [illegible] तरासु अविद्धिता
सुअंतरे मध्ये वाता; याः सीताश्रृताः वृषयश्च तासु सती पि अनिकेतवासिनी बहिर्वसंती तथा अस्याः अपीत्यर्थः। किल
ति पाठे किल त्यागात्। तीन पार [illegible] वित्य स[illegible]कं सो [illegible] निति सुनिश्चियं पारणोति रूपं ॥२२॥ निकामेति। न भस्त्रीरण।

इंधनसंभृतेन वह्निना निकामं श्रांता सा पार्वती तपात्यये ग्रीष्मागमे प्रावृषि नवैर्नूतनैर्वारिभिः सिक्ता सती भुवा भूमिसह उ
र्ध्वगामिनं उष्माणं बाष्पं अमुंचत्। इंधनप्रभववह्निना संतप्ता आश्रमभूरिव ऊर्ध्वं बाष्पं मुमुचे इत्यर्थः। न भस्यैरेणा
दित्येन इंधनसंभृतेन वह्निना चतुष्टयेनेति शेषः। वर्षाप्रवृत्ते तपात्यये इति हलायुधः॥२३॥ स्थिता इति। प्रथ
मये उदविंदवः जलविंदवः पक्ष्मसु क्षणं स्थिताः पक्ष्मणां अतिघनत्वात् ततः पतिताः संतः ताडिता अधरा अधरेण
तिसौकुमार्यात् निजाभिघातेनापि तत्र मनाक् चूर्णित व्यथा इत्यर्थः। ततः पयोधरयोः स्तनयोः उत्सेधे उच्छ्राये निपा
तेन चूर्णिताः नानात्वं गता इत्यर्थः। उत्सेधपदं काठिन्यद्योतनार्थं अनंतरं वलीषु स्खलिताः प्रतिहतवेगाः सं
तः चिरेण तस्याः नाभिं प्रपेदिरे आप्ताः। चिरप्राप्तौ हेतुः स्थिता इत्यादि स्थिता इत्यनेन पक्ष्मलादित्वं। ताडिता अध
रा इत्यनेन पल्लवाधरत्वं पयोधरेत्यादिना कठिनस्तनत्वं वलीष्वित्यादिना विषमवलित्वं चिरेण नाभिमित्यनेन न
तनाभित्वं इत्यनेन प्रकारेण अंगसौंदर्यं तपःसमुत्कर्षव्याजेन दर्शितं॥२४॥ शिलेति। महद्व्रतमत्र तपश्च महात्तपः ४०
महातपसः साक्ष्यस्थिताः क्षपाः चपः कठिन्मयैः उन्मिषितैः अवलोकनैः निरंतरासु अविच्छिन्नासु अंतरे म
धोवाताः यासां ताश्च ताः वृष्टयश्च तासु सतीपि अनिकेतवासिनी बहिरवस्थायिनी शिलाशयां दृष्टसंवे शि
नौ तां पार्वती व्यलोकयन्निव साक्षिणीभावः सादृश्यं अहश्च रात्रिश्च उभे च संध्ये इत्यादि वचनं रात्रेः कर्मसाक्षित्वप्रमाणं॥२५॥
निनायेति। सा पार्वती उदके वासः तस्मिन्यराचक्रवाकयोः पुरः अग्रे विविक्ते वियोगं प्राप्ते अत एव परस्परं क्रंदिति मिथुने सैव

पार्वती अत्यंतं हिममुत्किरतीति अत्यंतहिमोत्किरः अनिलः यासु ताः सहस्यपौषस्य रात्रीः निनाय अत्यवाहयत् । मिथुने कृपाव
तीत्यनेन दुःखितेषु तपस्विन्वा करुणा निक्षिप्ता नरउतयो विरोधिनी कामअद्द । पौषे तैषसहस्यौ द्वे इत्यमरः । किरतेः इगुप
धज्ञाप्रीकिरः क इति कः । पौषं वासवाहनादिषु चेति उदादेशः ॥२६॥ मुखेनेति ॥ सा पार्वती पद्मवत् सुगंधिना वेपमा
नः अधरशवपत्रं तेन शोभतइति शोभितेन मुखेन शिरात्रौ तुषारस्य हिमस्य वृष्ट्या दतापद्मानां संपत्सम्मृद्धिर्यासां ता
सा अपां सरोजैः सह संधानं अविघ्नं अकरोदिव । अस्याः मुखं उदकमध्ये कमलवद्भौ इत्यर्थः । निशाशब्दस्य पद्दन्नइत्या
दिना निशादेशः ॥२७॥ स्वयमिति । स्वयं आत्मना विशीर्णं च ततगलितं यस्य द्रुमस्य पर्णं तदेव वृत्तिः जीवनोपायो तस्य ।
तस्य भाव स्तत्ता परः परा काष्ठा हि । उत्कर्षो वस्थानं । तया उमया पुनः तदपि पर्णमपि अपाकीर्णं त्यक्तं । अतः पुराविदः ।
प्रियंवदां तां पार्वतीं अपर्णामिति वदंति । न विद्यते पर्णमाहरणं यस्या इति द्विपदइति राजेंदुरित्यादौ बिबा इति शब्दस्यानिषेधा
यकत्वात् द्वितीया । अथवा इति निर्हितो अपाकीर्णमिति हेतोः अतइति आद्यादित्वात् सप्तम्यर्थे तसिः । अतः अस्मिन् वनेतां
अपर्णां वदंति । हिशब्दो वधारणे । काष्ठोत्कर्षस्थितौ दिशीत्यमरः ॥२८॥ मृणालिकेति । सा पार्वती एवमादिभिः पंचाग्निप्रभ
तिभिर्व्रतैः मृणालिकावत् कोमलं स्वमंगं ग्लपयंती ग्लपयंती कठिनैः शरीरैः उपार्जितं तपः दूरं यथा तथा तथा अधश्चका
रातिरश्चकार । ऋषिभ्यो अधिकस्तपश्चचारेत्यर्थः । अधः स्निग्धं पदं अव्ययं अहश्च निशा च सर्वो द्वंद्व एकवद्भावः ॥२९॥
अथेति । अथानंतरं अजिनाषाढधरः कृष्णाजिनपलाशदंडधरः । प्रगल्भवाकू संस्कृतवाक् ब्रह्मम येन तेजसा ऽ

कुटी॰ ज्वलन्निव जटिलः जटावान् शरीरं वहन् अत्र आहिताग्न्यादित्वात् परनिपातः प्रथमाश्रमो यथा ब्रह्मचर्यमिव स्थितः॥ कश्चित्
पावनं मंत्रविष्टं। विवशवान्। पालाशो दंड आषाढ इत्यमरः। ब्रह्मचारिणो जटाधारणं मुंडो वा शिखी जटिलो वा स्यादिति मनुव
चनात्। जटाः अस्य संतीति जटिलः। पिच्छादित्वादिलच्॥३०॥ तमिति। अतिथिषु साध्वी आतिथेयी पार्वती बहुमानः श्रद्धा
पूर्वो यस्याः तया सपर्यया पूजया हेतुना तया तं ब्रह्मचारिणं प्रत्युदियाय। प्रत्युज्जगाम। पूजार्थमग्रतो गतेत्यर्थः॥ स्वय
मपि तपस्विनी कथमादरवती तत्राह। साम्यमतीति स्थि साम्ये निविष्टचेतसां प्राणिनां वपुर्विशेषु विशिष्टशरीरेषु पु
रुषेषु अतिशयितं गौरवं यासु ताः क्रियाः पूजा भवंति। सपर्याऽर्हणा इत्यमरः॥३१॥ विधिनेति। स जटिलः विधिना शास्त्रोक्तप्र
कारेण प्रयुक्तां क्रियां सत्क्रियां पूजां प्रतिगृह्य परिश्रमं वनाम विनीय अपनीय ऋजुना अवक्रेणैव चक्षुषा उमां पश्यन्
अनुज्झितः अपरित्यक्तः क्रमो येन स सन् वक्तुं प्रचक्रमे। आरब्धवान्। नामेत्यपरमार्थे असंतं परिश्रमं संतमिव अप
नीयेत्यर्थः। ऋजुनेनानेन विलाससाहित्यरहितेंगितादिप्रयोगानर्थो॥३२॥ अपीति। हे पार्वति ते क्रियार्थं होमाद्यर्थं स
मित्कुशं सुलभं किं। जलान्यपि स्नानस्य विधिः क्रिया तत्र क्षमाणि योग्यानि। स्वशक्त्या तपसि प्रवर्तसे। देहमपीडयि
त्वा तपः किं कुरुषे इत्यर्थः। तत्र हेतुमाह। खलु यस्मादाद्यं धर्मसाधनं शरीरं। समिधश्च कुशाश्च समित्कुशं। जा
तिरप्राणिनां सर्वो द्वंद्वो द्वंद्व इति वा एकवद्भावः। द्वितीति तालौ दामायुक्तेऽधमः ग्रन्ते हृते पिच्चेत्यमरः ऽकुं प्रश्नेः

४१

नुनयेत्वयि। अयि इति पाठे अपिः प्रश्नागर्हासमुच्चयप्रश्नशंकासंभावनास्वपि॥ ३३॥ अयीति। अयि अवर्जितदत्तो
यद्वा रितेन संस्कृतं उपचितं आसां पुरोवर्त्तिनीनां वीरुधां लतानां प्रवालं किसलयं अनुबंधि सानुबंधं उत्तरोत्तर
वृद्धियुक्तं किमित्यर्थः॥ यत्प्रवालं चिरोत्कितं पदलक्तकं त्वा द्वातेन पाटलेन ईषल्लोहितेन तेदं तव सखा ओष्ठेन तु
लां साम्यरूपमधिरोहति। त्वदोष्ठसस्मकां। तीत्यर्थः। दन्तान्वहेति आच्छादयतीति दन्तवासः अनुबंधः निरंतरप्रवर्त्तनं
अस्त्यर्थे इन्। तुल्याशब्दसंयोगे विकल्पे तृतीया प्रयोगस्य कारणमुक्तं रघुवंशषष्टीयां॥ ३४॥ अयीति। हे पार्वति ते मनः कर
स्यानन्दमानं प्रणयेन स्नेहेन अपहरंति तेषु हरिणेषु प्रसन्नं अनाविलं अयि किं। सापराधेषु विनिर्भ्रांतःकरण
त्वं तपः सिद्ध्यंगभूतत्वादिति भावः। कोपेहेत्वं पचले रिति पाठे उत्पलानीव विक्षेपेण चलानि विक्षेपोत्र वायुप्रेर
णं॥ ३५॥ यदुक्तमिति। हे पार्वति रूपं सौंदर्यं पापस्य वृत्तये करणाय न भवति। शीलमेवानुसरतीति लोके यदु
च्यते तद्वचः अतिविरतिः तव संपत् एवापपारयति। हे उदारदर्शने उत्तरे योगविकदर्शनेन ते शीलं तपस्विना
मप्युपदिश्यते अनेन तु उपदेशाः उपदेशमाधनं तस्य भावस्तत्तां गतं मुनयोपि त्वद्वृत्तमाददिरे इत्य
र्थः। शीलं स्वभावे सद्वृत्ते उदारो दातृमहतोरिति चामरः॥ ३६॥ विकीर्णेति॥ सान्वय एष महीधरः हिमवा
न् त्वदीयैरनाविलैश्चरितैर्यथा पावितः पवित्रीकृतः तथा दिवस्माकाशात् च्युतैः पर्वतोपरि स्पतितैः विकी

णैः इत्याश्चते सप्तर्षीणां वलयः पूजाश्चितैः प्रभासितं इति प्रभासिभिः गांगैः सलिलैर्नपावितः सप्तश्चते आषयश्च दि
कूसंख्येसेत्याधामिति कर्मधारयः।३७॥ अनेनेति। हे भामिनि अनेन कारणेन धर्मः त्रिवर्गसारः सन् अद्य मे सवि
शेषं यथा भवति तथा प्रतिभाति। प्रकाशते। यद्यस्मात् कारणात् मनसो निर्विषयाविषयो अर्थकामौ यस्या
स्तया त्वया एकएव धर्मः प्रतिगृह्य सेव्यते। त्रयाणां धर्मार्थकामानां वर्गः समूहस्तस्मिन्सारः श्रेष्ठः सारोब
ले स्थिरांशे वन्यायेप्ली वंवरे त्रिषुद्रस्यमरः। कोपनासेव भामिनीति च।३८। प्रयुक्तेति। हे सन्नगताःगात्रि आत्म
नात्मना त्वया प्रयुक्तः सत्कारविशेषः। पूजाविशेषो यस्य तं। मां परमन्यं संप्रतिपत्तुं ज्ञातुं नार्हसि। यद्यस्मात्का
रणात् सतां संगतं स्नेहः साप्तपदीनं सप्तभिः। पदैर्भवतीति साप्तपदीनं मनीषिभिरुच्यते। त्वया मम संभाषणे
पूर्वं पूजा कृता अतो हं तव मित्रमेवेत्यर्थः। साप्तपदीनं सख्यमिति निपातनात्साधुः। सन्नमारादिना सन्नतं
म्रं गात्रं यस्याः तस्याः संबोधनं।३९। अतइति। हे तपोधनाः अतः सखिभावात् अत्र तपश्चरणविषये हि जा
तिर्जोभावात् ब्राह्मणत्वात् उपपन्नं वा पलं बलस्य कर्म यस्य सोयं जनः जटिलः बहुत्वमां बहु साधु मर्हीभव
ती प्रष्टुं मनो यस्य सः भवतीति शेषः मया यत्पृच्छ्यमानं मितं इह स्यां गोप्यं न वेत्सि तत्वक्तुं अर्हसि।४०। प्र
ष्यमेव आह। कुलइति। अथमस्यावेधसः ब्रह्मणः कुले प्रसूतिः जन्म तव वपुः त्रयाणां लोकानां सम्म

हारस्त्रिलोकं तस्यैश्वर्यमिवानुदितं उत्पन्नं ऐश्वर्यसुखं अमरगं न मृगयितुं देहे गिरिराजपुत्रीत्वात्। वयः नवं
प्रथमं तव तपसः फलं अतः पूर्वोक्तेभ्यः परं किं स्यात्। किं भवेत्। त्वया तपसा यत्प्रार्थनीयं तत्सर्वं मत्त्येऽस्तीत्यर्थः। हिमवतः
हिरण्यगर्भप्रसूतत्वं यज्ञांशार्थं मया सह [illegible] इति भवानवलेश्वर इति वचनात्। लोकश [illegible] द्वेपा [illegible] दिप्यंठा
तु समाहारद्विगुद्वीपिपदेन नपुंसकत्वं। ४१। भवतीति। सुदुःसहात्तस्मात् कुसुमशय्यात् अनिशम [illegible] कृतादपि मनः
स्विनी नामी दृशी प्रतिपत्तिर्भवति। नामेति संभावनायां। तलं अधः स्थितं निम्नं उदरं यस्याः तस्याः संबोध
नं विकारमार्गं निर्णयमार्गेण प्रहितेन चेतसा लप्स्यते त्वं अनिष्टं दृश्यते। न ज्ञायते भयेति। शेषः। स्त्रियः अनि
ष्टनिवृत्त्यर्थं वा तपश्चरन्ति। तदप्यनिष्टं तव न संभवतीत्यर्थः। तलोदरीत्यनेन सुंदरीत्वमुक्तं। अतस्तव सुंदरी
त्वमेव लोकपालकत्वात् निष्टं नुयादित्यसंभावनार्था। अधःस्वरूपयोस्तु स्त्रीतलं स्यादित्यमरः। प्रतिपत्तिः
गौरवात् व्याप्तो प्रवृत्तो प्रागल्भ्यप्रतिभावनयोरपीति विश्वः॥ ४२॥ अलभ्येति। हे सुतनु त्वद्वयमाकृतिः अल
भ्यशोकाभिभवा यस्याः शोककस्य दुर्लभत्वमाह। तव पितुर्गृहे विमानना अपमानः नुतः। अभिन
वस्य दुर्लभत्वमाह। परेण अनिष्टेन अभिमर्षः बलात्कारस्पर्शः नास्ति। पर्वतराजपुत्रीत्वात्। ए
तद्य [illegible] नागस्य सर्पस्य शिरःस्थितं रत्नं तस्य [illegible] तद्य बालनायको वा करं प्रसारयेत। भूते
तदेवद्रढयति। न नगस्य सर्पस्य

कु०टी० रण इत्यप्यन्ति न तस्येवं रूपं स्मृतिरिति । सूत्रं यत इति पाठे स्थविरं नुरः यथा सर्पशिरोमणिं करेण ग्र
हीतुं न शक्नोति । तथा तवाभिवंछितं कोपि कर्तुं शक्नोतीति भावः । शोभने भ्रूवौ यस्याः सा सुभ्रूः संबोधने ।
पि सुभ्रूरित्येव भवितव्यं । उवङ्स्थानित्वात् नादी संज्ञाया अभावे ह्रस्वाभावात् अतः सुभ्रूः कुतस्ता
तग्रहे विमानने इति पाठांतरं कल्प्यं इति केचित् । मनुष्यजातित्वात् ऊङ् । ऊङुतः इति ऊङंतत्वात् उवङ्
स्थानित्वात् । नदी संज्ञाया अभावे नद्यार्ह्रस्व इत्यपरे । शोभना भ्रूर्यस्य स्येति सामान्ये नपुंसके
मन्यपदार्थत्वेन विवक्षितत्वात् नपुंसकह्रस्वत्वं विधाय अनंतरं गौरी संबोधने प्रयोज्यं । अथ
समस्तं च नपुंसकत्वं न निवर्तते । विकल्पः शक्यमूहितुमित्यादिवत् । अथ वा नेयङुवङ् स्था ८२
ने नावस्त्री इत्यनेन वा ग्रहणस्य सिंहावलोकितन्यायेनानुवर्त्तस्य व्यवस्थितविभाषात्वा
त् नदी संज्ञाप्रतिषेधाभावः ।४३। किमितीति । यौवने आभरणान्यपास्य त्यक्त्वा वार्द्धके
दुकूले शोभत इति शोभि वल्कलं । किमिति त्वया धृतं । प्रदोषे स्फुटाः चंद्रः तारकाः नक्षत्रा
णि च यस्याः सा विभावरी रात्रिः अरुणाय इति क्रियास्थानपदस्य कर्मणि स्थानिन इति च

तुर्थी। अरुणायलोहित्या यक ल्पता लोहित्येन विपरिणमतइत्यर्थः। अरुणाय अरुणां स्वर्यं गन्तुं क
ल्पत यदि। यथाप्रथम प्रयरे सवं इतारकारात्रिः अरुणां तु योग्या न भवति। एवं त्वमपि यो वने
न वल्कलं धारयितुं नार्हसि। नयोग्यासि इत्यर्थः। हृद्गुस्य भावो वार्द्धकं। हृं हृ मनोज्ञादित्वाद्वुञ्।
निनिकी। गितारके। तिपाठे विनिकाणि व्याप्तेत्यर्थः। विभावरी तमस्विन्योरजनीत्यमरः॥४४॥ दि
यदि दिवं प्रार्थयसे तर्हि श्रमाहृथा निष्फलः यतः तव पितुः प्रदेशाः देवभूमयः स्वर्गइत्यर्थः
अथ उपयन्तारं वरं प्रार्थयसे। तर्हि समाधिना तपसा अलं। तत्र हेतुमाह। रत्नं कर्तृ यहीता
रं नान्विष्यति। न गवेषयति। ततरत्नं नाग्यवद्भिः मृग्यते अन्विष्यते अतः त्वया वरो नावेष
णीयः वरेण त्वमेवान्वेषणीयेत्यर्थः। समाधिनेति प्रकृत्यादित्वात्तृतीया॥ अथेति अन्वे।
मंगलानंतरारंभप्रश्नकात्स्न्येष्वथो अथेत्यमरः॥४५॥ निवेदितमिति। हे पार्वति स्मितोष्माणा निःश्व
सितेन निवेदितं। कथितं। तथापि मे मनः संशयमेवाहते। प्रार्थितव्यः प्रार्थयितुमर्हस्त्वं न दृश्य

कुं॰ तेनावलोक्यते। यदि न विष्यति। सः प्रार्थितः सन् दुर्लभः कथं भविष्यति। विश्वविलक्षणसौंदर्यादिगु
णोपेतमात्वया। कश्चिद्वरः प्रार्थ्यते तन्मए व न दृश्यते। यदि विष्यति तदानीमेव लप्स्यत इत्यर्थः॥४६॥
अहो इति। हे पार्वति तवेप्सितो युवा कोपि अहो स्थिरः। कठिनहृदयः। युवा चिराय कर्णोत्पलैः शून्यतां गतिं कपो
लदेशे श्लथलंबिनीः शिथिलवन्धाः कलमानां शालिविशेषाणां अग्राणीव पिशंगाः पिंगलाः जटाः उपेक्षते अ
वज्ञानीते अनुवर्तयतीति भावः। अवेक्षत इति पाठे पश्यतीत्यर्थः॥४७॥ मुनीति। दिवा अनिंदुलेखामिव मु
व्रतैः अत्यंतं अतिमात्रं कर्षितं दिवाकरेण सूर्येण आप्लुष्टं दग्धं विभूषणानां आस्पदं यस्याः तां त्वां पश्यतश्च सचेतसः
चेतनस्य कस्य मनो न दूयते। नोपतपते। अपितु सर्वस्यैव अचेतनार्थं त्वं किमिति क्लेशं करोषीति भावः। पूर्वमेव कर्शा
गलादति मात्रपदं। चंद्रपक्षेपि दिवाकराप्लुष्टं लोकालंकरणभूतं कृत्यं यस्याः इति योज्यं। प्रतिष्ठा कृत्यमास्पदमित्य ४४
मरः॥४८॥ अवैमीति। हे पार्वति तव प्रियं स्वस्य सौभाग्यमदेन वंचितमवैमि। अवगच्छामि। वंचितं विप्रलब्धं अ
ववैमि अवगच्छामि। वंचितत्वमेवाह। यः प्रियः चतुरेण निरीक्षणे विशेषेण अवलोकयितुं शीलं यस्याः अतएव
अरालपक्ष्मणः; नतलोम्नः अधोदृष्टित्वात् अस्याः गौरी चक्षुषः आत्मीयं वक्त्रं लक्ष्यं न करोतीत्यर्थः। वक्त्रमुखं वदनं त
तइत्यर्थः। चतुरं किं चिदुत्कुसान्नमधुरयोः तताक्षो वीतिरिति चतुरलक्षणं इति नंदिनीमित्यमरः॥४९॥ किमदिति॥

हे गौरि कियद्यत्किंपरिमाणं चिरं चिरकालं श्राम्यसि। श्रांता वर्त्तसे। अहो कष्टं नाद्यापि तपसः फलोदय इति म
वः। अतः उपायान्तरं शृणु इत्यभिप्रायेण आह। ममापि पूर्वाश्रमे ब्रह्मचर्याश्रमे संचितं उपार्जितं तपो विद्यते।
तस्य अर्द्धभागेन कांक्षितं अभिलषितं वरं लभस्व प्राप्नुहि। तं वरं सम्यक् साधु वेदितुं ज्ञातुं इच्छामि। पूर्वा
श्रमे पि संज्ञाया अभावे पि एकाचिकरणेति निर्द्दिश्य अस्य मासः॥ ५०॥ इतीति॥ द्विजन्मना इति इत्थं पृष्ट
श्य वरः प्रार्थ्यते त्वयेति अभिप्रायं ज्ञात्वा अभिहिता उक्ता सा पार्वती मनोरथं शंसितुं न शशाक। वक्तु
लज्जया न समर्था अभूदित्यर्थः। अथो अनंतरं परिपार्श्ववर्त्तिनीं निकटस्थां वयस्यां सखीं विवर्त्ति
तं विवलितं अंजननेत्रं यस्मिन् कर्मणि तत्। ए दृताः यस्योत्तरं वक्तुं संज्ञां कृतवतीत्यर्थः। अनं
जनमिति तनया किं कज्जलवर्जिनात् स्वरूपमुक्तं॥ ५१॥ सखीति। तदीया पार्वती संबंधिनी सखी तं वर्णितं ब्रह्म
चारिणं उवाच किमिति हे साधो हे विद्वन् तव कुतूहलं चेत् निबोध जानीहि यस्मै इदं यदर्थं वरस्य कृते ए
तया पार्वत्या वपुः तपःसाधनं कृतं किमिव अंभोजं उष्णवारणमिव। यथा उष्णं वारयितुं समर्थं पद्मं आत
पनिवारणसाधनं क्रियते तथा अनया तपःसाधनं कृतमित्यर्थः। वर्णी हि हरिणीतीति इन्द्रेनिः। ५२॥ इ
यं पार्वती मानिनी इंद्रादीनां वरत्वकथने कोपनशीला सती अधिकाश्रीर्येषां महेंद्रप्रभृतिः आदि

र्येणां तान् चतुर्दिगीशान् अमत्य तिरस्कृत्य मदनस्य कामस्य निग्रहात् तद्रूपेण सौन्दर्येण हर्तुं स्ववशीकर्तुं अप्रा
कं अरूपहार्यं पिनाकः पाणौ यस्य तं शंभुं पतित्वेन आप्तुमिच्छति ॥५२॥ असह्येति । दहात् विशीर्णा गलिता
मूर्तिः वपुर्यस्य तस्यापि पुष्पधन्वनः कामस्य पुरा असह्यहुंकारस्य तेन निवर्तितः अतएव स्मरा
रिः स्वरं अमात्सुखे यस्य अह्नत हरप्रहार इत्यर्थः । शिलीमुखो बाणः इमां पार्वतीं हृदि व्यायतः बाढः
पातो यस्मिन् तत् अक्षिणोत् । अपीडयत् । तनुक्षिणु हिंसायां । स्मरारिमिति कृतपूर्वं कृतमिति वत् । गुण
भूता याऽविप्रापणक्रियायोगे कर्मणि द्वितीया । बाढव्यायत वत् गुरु वामनहृदारकातिशये इ समरः ।
॥५४॥ तदाप्रभृतीति । तदाप्रभृति कामबाणपातात्प्रभृति कृतः मदनः कामो यस्याः ललाटस्य अलंकारः
ललाटिकाललाटालंकारभूतं यच्चन्दनं अतिसंतापेन नीरसीभूतत्वात् तेन धूसराः अलकाः सै यस्याः सा
रूपं बालापार्वती पितुर्गृहे तुषारसंघातात् एव शिलातासां तलेष्वपि जातु कदाचिदपि निर्वृतिं सुखं न लभते स्म
न म प्राप । यत् ललाटिका न अलंकार इति केचित् । स्त्रीलिंगत्वं स्वनाबाल्या । एतद्धि शेषणं विवाहाभावस्य च
नार्थः । विवाहे तिलकादिसेवनात् ॥५५॥ उपात्तेति । पिनाकिनः वारिते त्रिपुरविध्वादौ उपात्तः गृहीतः वर्णि
गीतिक्रमः यस्य तस्मिन् सति इयं पार्वती [illegible] किन्नरीलाभगाति प्रायेण सबाष्पश्वासोत्कंठस्खलत

त्रस्खलितैः अस्फुटैः पदैर्वचनैः उल्लापनान्ते संगीतस्य सरव्यः किन्नरराजकन्यकाः अनेकशः अरोदयन् । ताः प्रिया
नुकीर्त्तनेन विह्वलखिन्नां त्वं मां दृष्ट्वा करुणार्त्ता अपि दुःखं वक्तुरित्यर्थः । वाष्पो नाम रोदनात्पूर्वं गलस्य स्रोतः
पूरकोद्भव विशेषः । रोहस्थायी संचारी आरोही चेति चतुर्विधा गानप्रकाराः । वनीतविपदं विकीर्तितपिनाकिचरित
स्य वृत्तान्तं । शुल्कादौ प्राणादौ वशा । भायामन्तरे जाते । गीतक्रमस्य कृतौ वर्णवर्णशब्दः प्रयुज्यते ॥ ५६ ॥ त्रिमा
गेति । सा इयं पार्वती लली यो मा गरित्र नागः शोभा यासां तां सुरांत्रिषु त्रपेणे नेत्रे निमील्य हे नीलकंठ इत्युक्त्वा असौ
ति असत्य श्वासोकंठ श्वासः तस्मिन्सति बाहुबंधनं ययाम सती सहसा व्यबुध्यत । जागरिता । स्वप्नेति एतया श्च
रोदनपतद्रूत्यर्थः ॥ ५७ ॥ सदा इति । हे शैलोऽल्प सर्वगतः इति सदा बुधैः पंडितैः उच्यसे भावस्थपदार्थमध्यगतं
इमजनने मां कथं न वेत्सि । इति रहसि मुग्धया अप्रगल्भया अनया त्वं हे शिव न वित्तः आसमन्तात् लिखितः चंद्रशेखर
रः उपालम्भः तत्र उपालम्भश्च श्रु उक्त समुद्भेच्च यार्थः च शब्दः । मुग्धयेति चित्रस्येश्वरोपालंभहेतुः भावोल्लीला
रः उपालम्भः तत्र पालम्भ ... प्रायज्जन्तुषु पदार्थ मात्रे सत्तायामिति यादवः ॥ ५८ ॥ यदेति । तपायं विचिन्वती उमा
क्रियावेष्टान्न्यस्मिन्प्राय जन्तुषु पदार्थ ... मात्रे सत्तायामिति
क्रियावेष्टान्न्यस्मिन्प्राप्यः स्वस्थो निः अधिगमं प्राप्तो विषयेत यो विना अन्यं विधिं नापश्यत । तदा गुरोः पितुः अ
यदा वनं गत्वा ते स्वस्थ्यं यातो निः ... सहतया वनं प्रपन्ना । संप्राप्ता ॥ ५९ ॥ कुमेष्विति । सरव्यो उमया स्वयं कृतत
नुत्तया रूपमुमा अस्माभिः

न्मसुतपः सासिषु एषु द्रुमेषु अपि फलं दृष्टं अस्याः तु मायाः शशिमौलिः संश्रयः आश्रयो यस्य सा मनोरथस्य
प्ररोहानुरवोपिन दृश्यते वस्त्वर्थः पठितः अनेन किं यष्टिश्चिरं आम्यसीत्यस्यो नरमभिहितं ।६०॥ नवेप्सीति॥
प्रार्थितः सन् दुर्लभः सशीघ्रः तपसा कृशां अत एव सखीभिः अश्रुनेत्रजलमंतरे मध्ययस्मिन् कर्मणि तत्तथा तद्वि
लां दृष्ट्वा इमां सखीं कदा अभ्युपपत्स्यते। अनुग्रहीष्यति। न वेद्मि न जानामि। कः का मिव। वृषांकः रुद्रः तस्य इंद्रा
स्य अवग्रहेण वृष्टिप्रतिबंधनेन क्षतां नाशितां सीतां लांगलपद्धतिमिव। वर्षती निवृष्या। वासवो वज्र लाहृषा
ती वा लांगलपद्धतिः इत्यमरः ।६१॥ अगूढेति। इंगितं स्वाभाविकचेष्टान्यथात्वं जानातीङ्गिति। इंगितज्ञा तया सु
ख्या अगूढः अगोपितः तस्याः गौर्या भावः अभिप्रायो यस्मिन् कर्मणि तत्तद्यथा निवेदितः नैष्ठिकसुंदरः शि
वः अपि हे गौरि मनोमनोरथविषयत्वात् अज्ञायमानं हर्षमिति वादिश्य अंजयन्निवर्थः। अमांश्च पच्छिन्ना। नौ।
कस्थासौ सुंदरश्च नैष्ठिकः उपाकुर्वाणश्चेति ब्रह्मचारी द्विविधः तयोः नैष्ठिकस्तु यावज्जीवं ब्रह्मचारी। सुंद
रशब्देन कामवत्वं लक्ष्यते। नैष्ठिकत्वं मनुष्ये पुनः संभवतीति देवो विवक्षितः। नैष्ठिकेषु ब्रह्मचारिषु सुन्दरः इं
गितमनस्यानङ्गस्विरात्कृति ग्रहणमाकार इति कोटिल्यः। द्रवकेलिपरीहासा इत्यमरः। एकेनैव अमन्दप्रतिपादकेन अपि
शाहेल अपि यद्धनवाप्स्नद्वयपतीतिः देवः किं वा पवस्यादिति वक्त ।६२॥ अथेति। अथ प्रश्नानंतरं मुकुला

कृताः अंगुलयो यस्य तस्मिन् अग्रं चासौ हस्तश्च तस्मिन् पकठिलाः खदन्नाणि तेषां मावे वमालिकां तं समर्पयन्ती आ
रोपयन्ती अद्दे स्तनम् आचिरं व्यवस्थापिता स्थिरीकृता वा नूपयामास सती कथं चित् स्मितान्तरं यथा तथा अमो
घत:६३। यथेति। हे वेदविदां वर त्वया यथा श्रुतं यदा तु तस्याभिगमे न गत्यते रित्यादिना सखीमुखाद्यदाकर्ण
र्णितं तत् तथैव अयं जनः मल्लक्षणो जनः उच्चैः स्थः पदेन ईश्वरो विवक्षितः। तस्य लंघनं प्राप्तिः तस्मि
न् अग्रं वासौ हस्तश्च तस्मिन्नुत्सुकः अधिरधि लघिगत्यर्थः इति दर्शनात् इदं मया क्रियमाणं तपः
तदीश्वरस्य प्राप्तेः साधनं किल साधनं भवतीत्यर्थः। यदि न भवति तर्हि किमिति तपः क्रियते। तत्राह।।
मनोरथानां गम्यत इति गतिः गम्यन गतिः अगतिः अविषय इत्यर्थः। न विद्यते अतः अननैव तस्या
प्तिः स्यादित्याशया तपः करोतीति भावः। दुर्लभस्य फलस्य तप एव साधनं त्वमपि जानासीति स्वना
र्थं वेदवेदांवर इति संबोधनं।।६४।। अथेति। अथ अनन्तरं वर्णी ब्रह्मचारी पार्वतीमाह। महेश्वरः वि
दितः ज्ञायमानः तिवुद्धीत्यादिना वर्ण्णमानैः। अर्थ्यत इति अर्थिनी तस्य ईश्वरस्य अर्थिनी न सतीत्वं
पुरएव पूर्वमेव मद्दर्शनात् पूर्वमेव वर्ण्णमहत्त्वार्थः। अथवा महेश्वरः विदितः अशेषगुणविशिष्टो ज्ञात

कुटी

४७

एवातदर्थिनी त्वं पुर एव अग्रत एव वर्त्तसे । तादृशमनंगं गतं प्राप्तुं परित्यज्य नवरित्वा अद्युनापि निर्लज्जा सती
मे पुरस्तात् वर्त्तसे किमिति न पलायसे इत्यर्थः । पुनरेवेति पाठे कामदहनं दृष्ट्वापि पुनरेव शंभुं किमि
ति दृष्टवानसि इत्यर्थः । तं महेश्वरं अनंगं गत्वा निवितानमस्मादीन्मितेषां अभ्यासः । पुनः पुनः तस्मिन्नेव वर्त्ते
नं तत्र रतिः प्रीतिर्यस्य तं विचिन्त्य अहं अनंगलोत्सुकायास्तव अनु स्मृतिं कर्त्तुं नोत्सहे ॥ अनुमतिदा
नेन त्वद्विनाशात् निराधनं कर्त्तुं नाध्यवस्यामि । आरोग्यं तु पुरः पूर्वं प्रथमं प्राक् पुरस्तात् इति हलायुधः
॥६५॥ अवस्त्विति । अवस्त्विति अयोग्यस्थले निर्बन्धः आग्रहः तत्परतत्परा तस्याः संबोधनं हे गौरि ते
आमुक्तं विवाहिकौतुकं कंकणसूत्रं सकरः शंभोः वलयीकृतः कंकणीकृतः अहिः सर्पो यस्य तेन मुक्ते
न तदेव प्रथमं यस्य तद्भूतत्त्वमबलं वनं वत्तत् कर्मभूतं कथं नु सहिष्यते । कौतुकं विषयाभोगहस्तसूत्रेषु
तत्कुतूहले इति अमरः ।६६। त्वमेवेति । हे गौरि त्वमेव तावत्संभ्रमेण तव धूदुकूलाडिने कदाचित्प्रा
वत्काले पिष्वतः स्वभावतः लोकसंप्रतिपन्ना योगं अर्हतः यदि चेत् यतत्व स्थिति तपस्तमोगोगानर्हत्व
मेव प्रतिपादयति । हंसाः लक्षणं विद्ध यस्य तत् [illegible] दुकूलं पट्टवस्त्रं वध्वाः शोणितं तस्य रक्तस्य विंदू

४७

47

न्वर्थमिति वर्षिगजस्य अजिनं चर्म वस्त्रं तावकं तूणसंत्रमाथित्वं यावत् तावन्नानुपुरेस्यादिवचनात् ॥ दृशावतुष्के ति । को
नाम परो विशतु रपि तव वतुष्कं स्ह विशेषः तत्र पुष्पाणां प्रकारे सम्मूहे अवकीर्णे ययोर्द्वयोः पादयोः अलक्तकं
लाक्षा अंकचिह्नं येषां तानि पदानि अवस्थानानि विकीर्णाः केशाः यासु परेतानां प्रेतानां मिकुस्मशानेषु
अनुमंस्यते । अनुज्ञास्यति । ईश्वरस्य पतित्वे तस्य श्मशानवासित्वात् तव पादयोः श्मशानावस्थानं स्यात् । को
विनांगीक्रियत इति भावः । पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु इत्यमरः ॥ ६८ ॥ अयुक्तेति । त्रिनेत्रस्य
त्वसि मूलमं वकुलं विताभस्मरजः कर्हि हरिचंदनस्य आस्पदे स्थाने तव असितं न द्रूपे पदं स्थानं करिष्यती
तियतः अतः परं किमयक्तरूपं नितांतं प्रशस्तिमपुक्तं । वदः । प्रशंसायां रूपं ॥ ६९ ॥ इयंचेति वारणराज्ञेन चे
सावतेन कृत्तेनेह धियारूढयापरिणीतया त्वया अधिष्ठितं वृष्णदं अवेक्ष्य मन्दजनः इत्यज्ञजनः स्मेरमुखो
नाविष्यहसिष्यतीतियतः । इयं तव वपुरतः अन्याविडंबना उपहासः । इह इत्यावाप्तावुद्दाव इह होदि इह होदस्क
गरफवद्रति । अवलुरसूत्रेण इह होहे ति निपातनाद कारांतः । पुरत इति विपर्यस्तः धन्यार्थक विधानमिति
लिकस्त्वपे आद्यादिभ्यात सिल् ॥ ७० ॥ इयमिति । कपालिनः ईश्वरस्य समागमो प्रार्थनया हेतुना

कु टी·

संप्रति द्वयं शोचनीयतां गतं प्रार्थ्यं किं तद्द्वयं । कला च सा कलावतश्चंद्रस्य कांतिमती सा प्रसिद्धा कला च । अस्य
लोकस्य नेत्रकौमुदी त्वं च । नेत्रानंदकत्वात् सत्यनेन लाघ्याः पूर्वं कालशोचनीयत्वं स्थितं । तथा च कृतया
विना किंनः समागमनप्रार्थनया पूर्वं कलामात्रेमच शोचनीयतां गतं । संप्रति क्रियमाणया समागमप्र
र्थनया त्वं च ।७१। वपुरिति । बालमृगस्य अक्षिणी व अक्षिणी यस्याः तस्याः संबोधनं परेषु यत्तद्रूपादि मृग्यते
तत् । व्यस्तं एकं वापि त्रिलोचने किमस्ति नास्तीत्यर्थः । वपुर्विरूपाक्षं विषमनेत्रत्वात् अलक्ष्यमत्तातंज
न्मयस्य तस्य भावस्तत्ता कस्य कुले अयं जात इति न ज्ञायत इत्यर्थः । दिगंबरत्वेन नग्नत्वेन वसुधनं निवे
दितं कथितं । कन्या वरयते रूपं माता वित्तं पिता श्रुतं । बांधवाः कुलमिच्छन्ति मिष्टान्नमितरे जनाः ।
एतन्मध्ये अस्य किमपि नास्तीत्यर्थः । व्यस्तं विमृश्य स्थितं एकैकमित्यर्थः ।७२। निवर्तयेति । हे गौरि अस
तत ईप्सितं च तस्मान्मनः निवर्तय निवारय । तद्विधः सर्पकपालादिविधाव कपालभस्मादि धारण
प्रकारो यस्य स ईश्वरः क्व पुण्यलक्षणा त्वं च क्व । एतदेव विशदयति । साधुजनेन श्मशानशूलस्य वैदिकी
वेदविहितयूपस्य सत्क्रियापूजा नापेक्ष्यते हि । यथा श्मशानशूलं यूपसत्क्रियया केनापि संस्क्रियते नेष्यते

४८

तथात्वमासेदिवः संसर्गात्तत्संस्कर्तुकेनापि न स्पृश्यते इति तदर्थं क्लेशं मा कुर्वित्यर्थः। श्मशानेनाति वध्वार्थमावे
पितः काष्ठविशेषः शूलः। शूलमस्त्रियामित्यमरः। ७३॥ इतीति। इत्थमनेन प्रकारेण द्विजातौ ब्रह्मचारि
णि प्रतिकूलं यथा तथा वादिनि सति प्रवेपमानः आसीत् अधरस्फुरत्तत्र अलक्ष्यः कोपो यस्याः अत एव वि
कुंचिते भ्रूलते यस्याः तथा उपांतयोः लोहिते कोपाद्रक्ते लोचने तिर्यक् आक्षिते निक्षिप्ते पराङ्मुखी॥
जातेत्यर्थः। निनिकुंचिते कुटिलीकृते भ्रुगति कौटिल्याली भावयोः। ७४॥ उवाचेति। पार्वती एनं ब्र
ह्मचारिणं उवाच। हे द्विज परं परमार्थतो न वेत्सि। नूनं निश्चितं। यतः कारणात् मामेवं आत्थ। ब्रूषे॥
मंदाः मूढाः महात्मनां अलोकसामान्यं अलोकसाधारणं न भवतीत्यलोकसामान्यं लोकवि
लक्षणमित्यर्थः। अचिन्त्याः विचारयितुमशक्याः हेतवो यस्य तत्तच्चरितं द्विषन्ति। निंदंति। तथापि मंदल
क्षणसद्भावात्। त्वमपि मंदोसीत्यर्थः। तर्कनिश्चयो नूनं। मूढाल्पापटुनिर्भाग्या मंदाः इति चामरः। ७५॥
इदानीं अमंगलाभ्यासरतमित्यादि यदुक्तं। तत्र यथाक्रममुत्तरमाह। विपदिति। विपदः प्रतीकारः
प्रतिक्रिया तत्परेण भूतिसमुत्सुकेन वैभवमिच्छता वा पुरुषेण मंगलं श्रेयः स्तबकं वल्लीनिषेव्यते॥

कु॰टी॰

जगद्गुरोरप्यस्य जगद्दातकस्य अनेन विपद्भावः सूचितः। निराशिषः निर्गताः आशीः अभिलाषो यस्मात् त
स्य सतः। अनेन भूतिसमुत्सुकत्वं राहितं सूचितम्। अस्य पाशिवस्य आशया कामनया उपहतः आत्मा येषां ते आ
शोपहतात्मानः तेषु वृत्तिर्येषां मंगलानां तानि रश्मिनिर्गलैः किं किं प्रयोजनम्। आमिरिति यादवः॥७६॥
अकिंचन इति। सर्वानुः अकिंचनः अविद्यमानधनः सन् संपदां प्रभवः उत्पत्तिस्थानम् इति त्रिदीर्य
ते। पिलसखप्रशमशानगोचरं स्थानं यस्य सस त्रिशिवद्दसुदीर्यते। अतः पिनाकिनः अर्थमनुगतः
यथार्थः तस्य भावः याथार्थ्यं तद्विदन्तीति विदः न संति अनेन नवस्तुनिर्वचनपरत्वादित्यपरि
तं॥७७॥ विभूषणेति। विश्वमूर्तेस्तस्य वपुः एवंविधमिति नावधार्यते। अवधारयितुं न शक्यते तथा
हि विभूषणेन भुजङ्गादिमात्रज्ञासिबंशीलं यस्य तत्स्यात् पिनद्धाः बद्धाः भोगिनः सर्पाः यस्य तद्वा
स्यात्। गजाजिनमालंबत इति गजाजिनालंबि पदवस्त्रं धारयतीति तद्वा स्यात्। कपालि शिरः स्थितं ब्रह्म
कपालाभरणं वा चंद्रः शेखरे यस्य तद्वा स्यात् त्वमेव तावत् परिचिन्तयेत्यादिपरिहितं॥७८॥ तदिति। विताया भस्म
जोरजोपि कर्त्तस्यई श्वरस्य अंगस्पर्शमवाप्य विशुद्धये पावित्र्याय कल्पते। समर्थं भवति। ध्रुवं निश्चितं नृत्ते नृत्तस
मये अजिन यक्रियया त्रुतं तद्भस्म दिवौकसां देवानां मौलिभिः विलुप्यते ध्रियते। भूमिपतितं भस्म पावित्र्यार्थं सो

४ए

ग्यार्थं च शिरस्यारोहत इत्यर्थः। अनेन नायुक्तमित्यादि दूषितं॥ १९॥ असंपद इति। प्रभिन्नः मत्तः दिग्वारणः ऐराव
तः वाहनं यस्य स वृषा इंद्रः उपगम्य वाहनादुत्तीर्य असंपदः अतएव वृषभेण गच्छतस्तस्य शिवस्य पादौ मौलिना वि
निद्राणां विकसितानां मंदारकुसुमानां रजसा अरुणाः अंगुलयो ययोस्तौ चकार। अनेन नेदृशं चेदित्यादि दूषितं॥
प्रभिन्नो गर्जितो मत्त इत्यमरः॥ २०॥ विवदतेति॥ दोषं विवदतापि च्युतात्मना नष्टचेतसा त्वया ईशं प्रति एकं अ
लक्ष्यजन्मेति साधु भाषितं। कुत इत्यत आह। यं आत्मभुवः ब्रह्मणोपि कारणमामनंति। स ईशः लक्ष्यः प्रभवः
उत्पत्तिर्यस्य स कथं भविष्यति। अनेन अलक्ष्यजन्मतेत्येतत्परिहृतं। विर एवेति पाठे प्रकाशयता॥ २१॥ अलमिति।
अथ वा विवादेन अलं कृतं। त्वया यथा श्रुतः तथाविध एव स परमेश्वरः अशेषं निःशेषं अस्तु मम मनः अत्र
ईश्वरे भावेन स्वभावेन एकः मुख्यः रसः प्रीतिर्यस्य तत्तथा स्थितं। कामवृत्तिः इच्छावर्त्ति मनः स्ववृत्ति वचनी
यं निंदां नेक्षते। अनेन न शोभा दूषणानि परिहृतानि। अशेषमिति क्रियाविशेषणं॥ २२॥ निवार्यतामिति। हे
आलि असौ वटुः पुनः किमपि विवक्षुः वक्तुमिच्छुः सन्। स्फुरितः उत्तराधरः अधरोष्ठो यस्य स जायते। निवार्यतां
यद्यत्तद्वा प्रलपतु तव किं तत्राह॥ यः महतः महापुरुषान् अपभाषते। विरुद्धं भाषते। निंदति। स एव केवलं पापभा
ङ्न। तस्मान्निंदकात् यः शृणोति सोपि पापी। गुरोर्यत्र परीवादो निंदा वा यत्र जायते। कर्णौ तत्र विधातव्यौ गंतव्यं

वाततोन्यतः॥ पश्चादृष्टा इति। अथवा इतः स्थानात् अन्यत्र गमिष्यामीति सती सा उमा सस्तनाभ्यां सकाशात् निन्नं
वल्कलं यस्याः सा सती चचाल च। वृषराजकेतनश्च स्वरूपमास्थाय स्थितः सन् तां स माललंबे जग्राह। टष्टं
तमिति। शैलाधिराजस्य हिमवतः तनया पार्वती तं शंभुं वीक्ष्य वेपथुमती प्रवतीसरसंगा यष्टिर्यस्याः। खेदद्रुताङ्ग-
यष्टिरित्यर्थः। सा सती निक्षेपणाय उद्धृतं उत्थापितं पदं उद्वहंती सती मार्गाचलः पर्वतस्य चैन व्यतिकरः संप
र्कः तेन आकुलिता सिंधुः नदी यथा न तस्थौ। देशोनदविशेषयोस्त्वौ सिंधुर्ना सरिति स्त्रियाम् इत्यमरः॥ ८५॥ अद्येति।
अवनतं नम्रं अंगं शरीरं यस्याः तस्याः संबोधनं अद्यप्रभृति तव तपोभिः क्रीतः दासोस्मि इति चंद्रमौलौ वादिनि स
ति सा पार्वती अह्नाय शीघ्रं तपोनिमित्तं क्लमं जसमसर्ज। तथाहि। क्लेशः फलेन सति उद्दिष्टफलप्राप्तौ सत्यां पुनः नव
भूतां नूतनत्वं नवि[illegible]धत्ते। न करोति। विधत्त इति पाठे क्लेशः लब्धेन फलेन स्वस्य नवतां नूतनत्वं विधत्ते। आ
ह्लादयति। पूर्ववदुक्लेशमनुभवमिति स्मर्यमाणत्वं न प्राप्नोतीत्यर्थः॥ ८६॥ इति श्रीमत्परमहंसपरिव्राज
काचार्यश्रीसरस्वतीतीर्थविरचितायां कुमारसंभवटीकायां पंचमः सर्गः॥ समाप्तः॥ शुभमस्तु॥ अथेति॥
अथानंतरं मिथः गौरी विश्वात्मने विश्वव्यापिने ईश्वराय सखीं संदिदेश। शंभुं बोधयितुं सखीमाज्ञापयदित्यर्थः॥
किं तत्तत्राह। मे दाता मन्मथ नानस्रमाणी क्रियतां प्रमाणं क्रियतां॥ प्रमाणग्रहे प्रयोगहेतुर्विवक्षितः॥ यावि ला

कु॰टी॰

महानायकारणी क्रियतामित्यर्थः। मिथोऽन्योन्यं रहस्यपि। प्रमाणं हेतुमर्यादाश्रयत्नात्प्रमाः रघुदूत्तमदः॥१॥ तयेति

तयाऽसत्व्या अभ्यासेनिकटे समीपवर्त्यप्रिये विषव्याहृतेः कथितः संदेशो यया अत एव निभृता निश्चला लालज्जावशा

दनावघ्राणा सागौरीव मौ। के वा अभ्यासे मधौ वसंते विषयोपरम्भ कोकिलेव ज्ञातं मुखं यस्याः मुखरित कोकिले

त्यर्थः। चूतयष्टिराम्रलतेव परान्नतेति क्रियार्थं प्राधान्यात् ज्ञाते रितिङीन्न न भवति। आभाष्य इति पाठे आलाना

र्हप्रिय इति जोऽयं॥७॥ स इति॥ स्मरं शासती विस्मरशासनः सशंभुः तथेति प्रतिज्ञायकथमभक्त्वादुमां विसृज्य ज्योतिर्मे

यान् ज्योतिः प्रभुरानसप्तर्षीन् सस्मार। स्मृतवानृ वसिष्ठः मरीचिः अत्रिः अंगिराः पुलस्त्यः पुलहः क्रतुः इति

सप्तर्षयः। स्मरशासन इति पदं सपाकिति कामे दग्ध इति

५१

51

८७३

काव्य प्रदीपः